# छत्तीसगढ़ माध्यमिक शिक्षा मण्डल रायपुर द्वारा निर्मित प्रश्न बैंक

# 2023-24



## कक्षा 10

## संस्कृत

# अनुक्रमणिका


| क्र. | विषय सूची | निर्धारित अंक | पृ. क्र. |
|---|---|---|---|
| 1 | शब्दरूप–आधारिताः प्रश्नाः | 2 | 3 |
| 2 | संख्या–आधारिताः प्रश्नाः | 2 | 10 |
| 3 | धातुरूप–आधारिताः प्रश्नाः | 2 या 3 | 12 |
| 4 | अव्यय–आधारिताः प्रश्नाः | 2 या 3 | 19 |
| 5 | सन्धि–आधारिताः प्रश्नाः | 3 | 24 |
| 6 | समास–आधारिताः प्रश्नाः | 3 | 30 |
| 7 | प्रत्यय–आधारिताः प्रश्नाः | 3 | 37 |
| 8 | कारक–विभक्ति आधारिताः प्रश्नाः | 2 या 3 | 46 |
| 9 | वाच्य–आधारिताः प्रश्नाः | 1 या 2 | 49 |
| 10 | अशुद्धि शोधनम् | 3 या 2 | 53 |
| 11 | उपसर्ग–आधारिताः प्रश्नाः | 1 या 2 | 58 |
| 12 | पत्र–लेखनम् | 4 | 60 |
| 13 | गद्यांश–आधारिताः प्रश्नाः | 6 | 63 |
| 14 | पद्यांश–आधारिताः प्रश्नाः | 6 | 84 |
| 15 | पाठ आधारिताः प्रश्नाः | 8 | 87 |
| 16 | सुभाषितानि | 5 | 96 |
| 17 | सूक्तयः | 4 | 97 |
| 18 | पाठ–आधारिताः वस्तुनिष्ठ प्रश्नाः | 6 | 101 |
| 19 | अनुच्छेद / निबन्ध लेखनम् | 6 | 108 |
| 20 | अपठित – गद्यांशाः | 4 | 111 |

# 1. शब्दरूप–आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखितेषु वाक्येषु रेखांङ्कितपदानां मूलशब्दाः निर्दिष्यन्ताम् –

i. त्वं भ्रमणाय कुत्र गमिष्यसि ?

ii. वधूः स्वपितृगृहं गतवती।

iii. संमोहात् स्मृतिविभ्रमः।

iv. तस्यै बालकाना क्रीडनकं क्रीडनं रोचते स्म।

v. धन्यानाम् उत्तमं दाक्ष्यम्।

प्रश्न 2 – प्रत्येकवाक्यसमक्षं कोष्टके विकल्पद्वयम् अस्ति।उपयुक्तपदेन वाक्यपूर्तिः क्रियताम्।

i. त्वं अस्य उत्तरं .................... पृच्छ। ( लतां / लतया )

ii. अध्यापिका .................... उपहारं यच्छति। ( वन्दनाम् / वन्दनायै )

iii. मालाकारः .................... पुष्पाणि आनयति। ( वाटिकायाः / वाटिकया )

iv. भीष्मः ....................पुत्रः आसीत्। ( गंङ्गाम् / गङ्गायाः )

v. अशोकः .................... अतीव कुशलः। (चित्रकलायाम् / चित्रकलाम् )

प्रश्न 3 – उदाहरणम् अनुसृत्य रिक्तस्थानानि उचितशब्दरूपेण पूरयतु।

उदा. अयं बालकः अस्ति। बालकस्य हस्ते कलमम् अस्ति।

i. सः शिक्षकः अस्ति। .................... हस्ते पुस्तकं अस्ति।

ii. सः विद्वान् अस्ति। .................... हस्ते ग्रन्थः अस्ति।

iii. सा नदी अस्ति।.................... तटे वृक्षः अस्ति।

iv. सा माता अस्ति। .................... हस्ते पात्रम् अस्ति।

v. तत् भाजनम् अस्ति। .................... मध्ये तैलम् अस्ति।

प्रश्न 4 – उचितपदैः रिक्तस्थानानि पूरयत –

i. बालाः .................... नमन्ति।

(क) जनकेन (ख) जनकम्

(ग) जनकस्य (घ) जनकं

ii. .................... गुणाः सन्ति।

(क) भवान् (ख) भवति

(ग) भवतः (घ) भवन्तः

iii. बालिका .................... सह मन्दिरं गच्छति।

(क) सख्या (ख) सख्युः

(ग) सख्यौ (घ) सखा

iv. .................... जलम् आनयतु।

(क) स्वसा (ख) स्वसरि

(ग) स्वस्रे (घ) स्वसारम्

v. नास्ति अभावः .................... मूर्खाणाम्।

(क) जगत् (ख) जगति

(ग) जगतः (घ) जगती

प्रश्न 5 – उचित विभक्तिभिः रिक्तस्थानानि पूरयत –

i. एषः .................... सदृशः अस्ति। ( कवि )

ii. एतत् .................... गृहम् अस्ति। ( युष्मद् )

iii. .................... आज्ञा शिरोधार्या। ( जनक )

iv. .................... पाचकाः भोजनं पचन्ति। ( तत् )

v. .................... ऋते सुखं नास्ति। ( ज्ञान )

प्रश्न 6 – अधोलिखित उपपदवि–भक्तिनां–निर्देशनं क्रियताम्।

i. निकषा योगे .................... विभक्तिः।

ii. अलम् (पर्याप्तार्थे) योगे .................... विभक्तिः।

iii. स्निह् योगे .................... विभक्तिः।

iv. निपुणः योगे .................... विभक्तिः।

v. नमः योगे .................... विभक्तिः।

vi. बहिः,विना ,ऋते योगे.............. विभक्तिः।

vii. सम, सदृष, तुल्य योगे........................ विभक्तिः।

प्रश्न 7 – अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विभक्तिं वचनञ्च लिखत –

i. बस्तरस्य सौन्दर्यं द्रष्टुं गच्छामि।

ii. भवन्तः मम गृहम् आगच्छन्तु।

iii. वरस्य ज्ञातिभिः जनैः बध्वाः स्वागतं कृतम्।

iv. मृगाः मृगैः सङ्गमनुव्रजन्ति।

v. तस्य भार्या बैशाखा एकां स्वस्थां बालाम् अजनयत्।

vi. लोभात् त्यजति मित्राणि।

vii. चन्दनदास ! एष एव ते निश्चयः ?

viii. प्रतिदिनमेव मे कक्षायाः बहिः निष्कासनं क्रियते।

ix. आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत्।

x. तौ धर्मपरायणौ आस्ताम्।

प्रश्न 8 – एषु भिन्नविभक्तिपदम् अस्ति।

i. संस्कृतम्, आपणम्, माम्, व्याकरणम्।

ii. तस्मै, भ्रमणाय, शृगालाय, वरस्य।

iii. क्रोधात्, पापात्, संमोहात्, सुप्रभातम्।

iv. अरपानद्याः, कल्याणसायस्य, बिलासायाः, नौकया।

v. बुद्धिमान्, अज्ञानेन, माता, तपः।

vi. सफलताम्, नारायणपुरे, सर्वासु, वर्धायाम्।

vii. सुखेन, गहने, न्यायाधीशेन, गान्धिना।

viii. अस्मिन्, तेन, अनेन, मया।

ix. जनकाः, विद्वांसः, भवतः, जगन्ति।

x. शिशवे, भवते, द्वारे, विदुषे।

प्रश्न 9 – शब्दरूपेण सह विभक्तीनां सुमेलनं करोतु।

| शब्दरूपम् | विभक्तिः | सुमेलनम् |
|---|---|---|
| युष्मत् | तृतीया | ………………… |
| सरिते | द्वितीया | ………………… |
| द्वारे | पञ्चमी | ………………… |
| कविना | चतुर्थी | ………………… |
| सखायम् | सप्तमी | ………………… |

CBSE

प्रश्न 10 – विभक्त्या सह शब्दरूपाणां सुमेलनं करोतु।

| विभक्तिः | शब्दरूपम् | सुमेलनम् |
|---|---|---|
| सप्तमी एकवचनम् | शिशू | .................... |
| षष्ठी बहुवचनम् | छात्रात् | .................... |
| पञ्चमी एकवचनम् | सखिभिः | .................... |
| तृतीया बहुवचनम् | विदुषाम् | .................... |
| प्रथमा द्विवचनम् | तस्याम् | .................... |

प्रश्न 11 – उचितं विकल्पं चित्वा उत्तरतु।

i. अधोलिखितेषु वाक्येषु चतुर्थी–विभक्तिः अस्ति।

(क) क्रोधात् भवति संमोहः। (ख) देशमाख्याति भाषितम्।

(ग) पिता पुत्राय क्रुध्यति (घ) सा स्वकार्ये निपुणा अस्ति।

ii. 'जनकेषु' पदे विभक्तिः अस्ति।

(क) द्वितीया (ख) चतुर्थी

(ग) षष्ठी (घ) सप्तमी

iii. परितः योगे विभक्तिः भवति।

(क) द्वितीया (ख) चतुर्थी

(ग) पञ्चमी (घ) सप्तमी

iv. 'समम्' योगे विभक्तिः भवति।

(क) द्वितीया (ख) तृतीया

(ग) चतुर्थी (घ) षष्ठी

v. 'सरिति' इति पदे .................... विभक्तिः अस्ति।

(क) सप्तमी (ख) तृतीया

(ग) द्वितीया (घ) षष्ठी

vi. 'प्रीति' शब्दस्य तृतीया एकवचनं रूपम् अस्ति।

(क) प्रीत्या
(ख) प्रीतै
(ग) प्रीत्याम्
(घ) प्रीतयः

vii. पञ्चमी विभक्तिः अस्ति।

(क) बिलासायाः पितुः नाम परसू अस्ति।
(ख) रामात् कृष्णः श्रेष्ठतरः।
(ग) छात्रः कक्षायाम् अतिष्ठत्।
(घ) पिता पुत्र्यां स्निह्यति।

viii. ''ग्रामं समया नदी प्रवहति'' इति वाक्ये उपपद विभक्तिः अस्ति।

(क) द्वितीया
(ख) तृतीया
(ग) चतुर्थी
(घ) षष्ठी

ix. 'तासाम्' पदे विभक्तिः अस्ति।

(क) सप्तमी बहुवचनम्
(ख) षष्ठी बहुवचनम्
(ग) पञ्चमी बहुवचनम्
(घ) तृतीया बहुवचनम्

x. 'सह–साकं–सार्धं समम्' योगे विभक्तिः भवति।

(क) प्रथमा
(ख) द्वितीया
(ग) तृतीया
(घ) चतुर्थी

xi. 'स्वामिना' पदे विभक्तिः अस्ति।

(क) चतुर्थी
(ख) तृतीया
(ग) द्वितीया
(घ) षष्ठी

xii. 'कविषु' पदे वचनम् अस्ति।

(क) एकवचनम्
(ख) द्विवचनम्
(ग) बहुवचनम्

xiii. 'महानदी सिहावापर्वतात् प्रभवति' अस्मिन् वाक्ये 'पर्वतात्' पदे विभक्तिः अस्ति।

(क) सप्तमी (ख) द्वितीया

(ग) षष्ठी (घ) पञ्चमी

xiv. क्रीडनं.................... अपि रोचते।

( मह्यम् / मम् / माम् / अहम् )

xv. 'रामाय फलं ददाति' अस्मिन् वाक्ये विभक्तिः अस्ति।

(क) तृतीया (ख) चतुर्थी

(ग) पञ्चमी (घ) षष्ठी

xvi. 'कस्मात्' इति पदे विभक्ति ....................अस्ति।

(क) तृतीया (ख) चतुर्थी

(ग) पञ्चमी (घ) सप्तमी

# 2. संख्या–आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखितान् संख्याङ्कान् शब्दैः लिखत।

117, 129, 145, 102, 133 ,135,139, 142,149, 150

प्रश्न 2 – अधोलिखितान् संख्याङ्कान् अङ्कैः लिखत।

(क) नवाधिकं शतम्
(ख) पञ्चविंशत्यधिकं शतम्
(ग) पञ्चाशदधिकं शतम्
(घ) त्रयस्त्रिंशदधिकं शतम
(ङ) अष्टादशाधिकं शतम्

प्रश्न 3 – संख्याः संस्कृतेन अनुवादं करोतु।

(क) एक सौ सोलह
(ख) एक सौ तेईस
(ग) एक सौ उनतालीस
(घ) एक सौ छः
(ङ) एक सौ चवालीस

प्रश्न 4 – कोष्ठकदत्तेषु संख्याः शब्दैः लिखित्वा वाक्यानि पुनः लिखतु।

(क) कक्षायां (107) छात्राः वर्तन्ते।
(ख) आम्रवृक्षे (145) आम्रफलानि फलितानि सन्ति।
(ग) क्रीडाङ्गने (120) बालिकाः क्रीडन्ति।
(घ) रमा अभ्यासपुस्तिकां क्रेतुं (130) रूप्यकाणि याचति।
(ङ) भावेशः प्रतिदिनं (108) वारं शिवमन्त्रं जपति।

प्रश्न 5 – अधोलिखिताः संख्याः विलिख्य तदुत्तरवर्तीः संख्या अपि लिखत।

139, 120, 132, 148, 105

प्रश्न 6 – शुद्धं विकल्पं चिनुत –

(क) (149) अस्य संस्कृते शुद्धं रूपम् अस्ति।

(i) एक शतं नवचत्वारिंशत् (ii) एकोन एक पञ्चाशत्

(iii) एकोन पञ्चाशदधिकं शतम् (iv) एकोनपञ्चाशत्

(ख) पुस्तकालये 125 पुस्तकानि सन्ति।

(i) एक पञ्चविंशति (ii) पञ्चविंशतिः एक शतम्

(iii) पञ्चविंशत्यधिकं शतम् (iv) पञ्च द्वि शतम्

(ग) मम पार्श्वे ऊनत्रिंशदधिकं शतं रूप्यकाणि सन्ति।

(i) 129 (ii) 139

(iii) 130 (iv) 149

(घ) सभागारे 144 जनाः उपस्थिताः सन्ति।

(i) चत्वारिंशदधिकं शतम् (ii) चतुश्चत्वारिंशदधिकं शतम्

(iii) चर्तुचत्वारिंशदधिकं शतम् (iv) चतश्चत्वारिंशतधिकम्

(ङ) (139) अस्य पूर्ववर्ती संख्या अस्ति।

(i) ऊनचत्वारिंशदधिकं शतम् (ii) अष्टचत्वारिंशदधिकं शतम्

(iii) चत्वारिंशदधिकं शतम् (iv) अष्टत्रिंशदधिकं शतम्

प्रश्न 7 – सुमेलनं कुरुत –

| (क) | (ख) | सुमेलनम् |
|---|---|---|
| 113 | त्रयश्चत्वारिंशदधिकं शतम् | ..................... |
| 123 | त्रयस्त्रिंशदधिकं शतम् | ..................... |
| 103 | त्रयोदशाधिकं शतम् | ..................... |
| 143 | त्रयोविंशत्यधिकं शतम् | ..................... |
| 133 | त्रयधिकं शतम् | ..................... |

# 3. धातुरूप–आधारिताः प्रश्नाः

प्रश्न 1 – एतानि वाक्यानि वर्तमानकालतः भूतकाले परिवर्तनं क्रियताम्।

i. मञ्चे नर्तकी नृत्यति।

ii. त्वं कार्यं करोषि।

iii. शिष्यः गुरूं प्रश्नान् पृच्छति।

iv. बालाः नीतिशास्त्रं पठन्ति।

v. मह्यं मिष्ठान्नं रोचते।

प्रश्न 2 – उचित–धातुरूपेण रिक्तस्थानानि पूरयतु।

i. पुरा राजा दशरथः अयोध्यायाः राजा (अस्–लङ्लकारः) ।

ii. तस्य चत्वारः पुत्राः (अस्–लङ्लकारः) ।

iii. अद्य भवान् मम गृहे भोजनं (कृ–लृट्लकारः)।

iv. श्वः अहं भगिनीं प्रति पत्रं (लिख्–लृटलकारः)।

v. प्रातःकाले क्रीडनं मह्यम् अपि (रूच्–लट्लकारः)।

vi. त्वं सत्यं (कथ्–लट्लकारः)।

vii. अधुना यूयं कदलीफलानि एव (भक्ष्–लोट्लकारः)।

viii. ह्यः विद्या वार्षिकोत्सवे (नृत्–लङ्लकारः)।

ix. पुत्राय वृथा मा (क्रुध्–विधिलिङ्लकारः)।

x. आगामि सोमवासरे अहं गृहे न (वृत्–लृट्लकारः)।

xi. तानि सर्वाणि मित्राणि संध्या–चलचित्रगृहे (मिल्–लृट्लकारः)।

xii. वयं प्रतिदिनं उद्याने (मिल्–लृट्लकारः)।

xiii. माता पुत्रं आपणं गमनाय (कथ्–लङ्लकारः)।

xiv. सिंहः प्रतिदिनं एकं मृगं हत्वा (भक्ष्–लोट्लकारः)।

xv. सुधायै आंग्लभाषा न (रूच्–लट्लकारः)।

प्रश्न 3 – अधोलिखितेषु वाक्येषु रेखाङ्किकतपदानां लकारं पुरूषञ्च लिखत।

i. युवानश्चापि सक्रियाः भविष्यन्ति।

ii. ग्रामवासिनः वराकमतिथिमेव चौरं मत्वा अभर्त्सयन्।

iii. इदानीं निजकृतस्य फलं भुङ्क्ष्व।

iv. किमहं करोमि ?

v. सहपाठिन्यः मामेव लक्षीकृत्य हसन्ति।

vi. विद्या क्रीडनकं क्रेतुं आपणं यास्यति।

vii. नववस्त्राणि परिधाय लक्ष्मीपूजनं करिष्यामि।

viii. तौ धर्मपरायणौ आस्ताम्।

ix. दिनान्ते पिबेत् दुग्धम्।

x. आज्ञापयतु आर्य !

xi. न जानामि।

xii. तमसा न प्रकाशते।

xiii. तौ अरपानद्याः तटे अतिष्ठताम्।

xiv. तैः सह बिलासा साहसेन युद्धम् अकरोत्।

xv. भवन्तः मम गृहम् आगच्छन्तु।

प्रश्न 4 – उचितं मेलनं कुरुत।

(अ)

| (क) | (ख) | उचितं मेलनम् |
|---|---|---|
| गमिष्यति | विधिलिङ्लकारः | ................... |
| इच्छामि | लोट्लकारः | ................... |
| रोपयाम | लङ्लकारः | ................... |
| आगच्छेत् | लृट्लकारः | ................... |
| आगच्छत् | लट्लकारः | ................... |

| (ब) (क) | (ख) | उचितं मेलनम् |
|---|---|---|
| बिभेमि | लङ्लकार: | ..................... |
| देहि | लृट्लकार: | ..................... |
| अपृच्छत् | विधिलिङ्लकार: | ..................... |
| भविष्यामि | लोट्लकार: | ..................... |
| समाचरेत् | लट्लकार: | ..................... |

| (स) (क) | (ख) | उचितं मेलनम |
|---|---|---|
| लङ्लकार: | आह्वयसि | ..................... |
| लृट्लकार: | अजनयत् | ..................... |
| लट्लकार: | विन्देय | ..................... |
| लोट्लकार: | दास्यामि | ..................... |
| विधिलिङ्लकार: | आज्ञापयतु | ..................... |

प्रश्न 5 – शुद्धं विकल्पं चित्वा लिखत।

i. विद्या विनयं ..................... । ( दद्–लट्)

(क) ददाति (ख) ददातु

(ग) यच्छति (घ) दास्यति

ii. युवां संस्कृतं ..................... । ( लोट् )

(क) पठतु (ख) पठेताम्

(ग) पठतम् (घ) पठताम्

iii. ते किं ..................... ? ( लोट् )

(क) लिखानि (ख) लिखत्

(ग) लिखत (घ) लिखन्तु

iv. सः कार्यम् अधुना एव ..................... । ( विधि )

(क) कुर्यात् (ख) कुर्यात

(ग) कुर्युः (घ) करवाणि

v. यूयं दशमकक्षायां ..................... । ( लट् )

(क) पठसि (ख) पठथः

(ग) पठथ (घ) पठन्ति

vi. एकवचनं क्रियारूपम् अस्ति।

(क) भवन्ति (ख) गच्छन्ति

(ग) हन्ति (घ) वदन्ति

vii. ताः बालिकाः ..................... । ( लट् )

(क) नृत्यति (ख) नृत्यन्ति

(ग) नृत्यथ (घ) नृत्यामः

viii. युष्मभ्यं किम् अतीव ..................... । ( लट् )

(क) रोचते (ख) रोचन्ते

(ग) अरोचध्वम् (घ) रोचताम्

ix. मह्यं पक्वानि आम्रफलानि अतीव (लट् )

(क) रोचते (ख) रोचन्ते

(ग) अरोचत् (घ) रोचन्ताम्

x. पिता पुत्राय ..................... । ( लट् )

(क) क्रुध्यति (ख) क्रुध्यन्ति

(ग) क्रुध्यसि (घ) क्रुध्यामि

xi. ते कदापि न ..................... । ( लृट् )

(क) मिलन्ति (ख) मेलिष्यन्ति

(ग) मिलन्तु (घ) अमिलत्

xii. परह्यः गुरूः मह्यं ..................... । (लङ् )

(क) क्रुध्यति (ख) अक्रुध्यत्

(ग) क्रुध्येत् (घ) क्रोत्स्यति

xiii. बहुवचनं क्रियारूपम् अस्ति।

(क) करिष्यथः (ख) अकुरूतम्

(ग) करिष्यथ (घ) कुर्यात्

xiv. द्विवचनं क्रियारूपं नास्ति।

(क) कथयतः (ख) कथयथः

(ग) कथयावः (घ) कथयामः

xv. लट्लकार–क्रियारूपम् अस्ति।

(क) लिखामः (ख) अलिखाम

(ग) लिखाम (घ) लिखेम

xvi. लृट्लकार–क्रियारूपम् अस्ति।

(क) क्रोत्स्यसि (ख) क्रुध्यति

(ग) क्रुध्यानि (घ) क्रुध्येयः

xvii. 'दृष्टिपूतं न्यसेत् पादम्' इदं वाक्यम् अस्ति।

(क) लट्लकारे (ख) लोट्लकारे

(ग) लृट्लकारे (घ) विधिलिङ्लकारे

xviii. लोट्लकारस्य उदाहरणवाक्यम् अस्ति।

(क) आपदगतं न जहाति । (ख) निन्दन्तु नीतिनिपुणाः।

(ग) अजानात् सकलं वेद्यम्। (घ) भविष्यति सुप्रभातम्।

xix. 'मित्र! अहं जलात् बिभेमि' अस्य वाक्यस्य लकारः अस्ति।

(क) लट्लकारः (ख) लोट्लकारः

(ग) लृट्लकारः (घ) लङ्लकारः

xx. लोट्लकारदृष्ट्या भिन्नपदमस्ति।

(क) वर्तताम् (ख) वर्तेताम्

(ग) अवर्तेताम् (घ) वर्तन्ताम्

प्रश्न 6 – अधोलिखितानां क्रियापदानां पुरूषंवचनञ्च लिखत।

| | क्रियापदम् | पुरूषः | वचनम् |
|---|---|---|---|
| i. | वर्तावहे | ...................... | ...................... |
| ii. | अरोचे | ...................... | ...................... |
| iii. | नर्तिष्यामः | ...................... | ...................... |
| iv. | क्रुध्यसि | ...................... | ...................... |
| v. | लिखतम् | ...................... | ...................... |
| vi. | मिलथ | ...................... | ...................... |
| vii. | कुर्वन्ति | ...................... | ...................... |
| viii. | कथयन्ति | ...................... | ...................... |
| ix. | भक्षयेत् | ...................... | ...................... |
| x. | वर्तस्व | ...................... | ...................... |

प्रश्न 7 – अधोलिखतानि क्रियापदानि वाक्येषु प्रयोगं कृत्वा लिखत।

(क) क्रुध्यामः (ख) शिक्षते स्म

(ग) अनृत्यम् (घ) अरोचन्त

(ङ) लिखेयुः (च) मेलिष्यामि

(छ) कथयति (ज) करवाणि

(झ) भक्षय (ञ) वर्तन्ते

CBSE

प्रश्न 8 – निर्देशानुसारं धातुरूपं लिखत।

(क) वृत् – लृट्लकार – उत्तमपुरूष – बहुवचनम् ............................

(ख) रूच् – लट्लकार – मध्यमपुरूष – द्विवचनम् ............................

(ग) नृत् – लङ्लकार – अन्यपुरूष – एकवचनम् ............................

(घ) क्रुध् – लोट्लकार – अन्यपुरूष – बहुवचनम् ............................

(ङ) लिख् – लृट्लकार – मध्यमपुरूष – द्विवचनम् ............................

(च) मिल् – विधिलकार – उत्तमपुरूष – एकवचनम् ............................

प्रश्न 9 – निर्देशानुसारं वचनं परिवर्तनं कृत्वा लिखत।

(क) करोषि – बहुवचनम् ............................

(ख) मिलाव – एकवचनम् ............................

(ग) कुर्याम् – बहुवचनम् ............................

(घ) कथयति – द्विवचनम् ............................

(ङ) अमिलः – बहुवचनम् ............................

# 4. अव्यय–आधारिताः प्रश्नाः

प्रश्न 1 – मञ्जूषातः चित्वा उचितेन अव्यययुग्मेन रिक्तस्थानानि पूरयतु।

( यत्र–तत्र, यथा–तथा, यदा–तदा, यावत्–तावत् )

(क) .................... बीजं .................... फलम्।

(ख) .................... मेघाः गर्जन्ति .................... मयूराः नृत्यन्ति।

(ग) .................... देशः ....................वेशः।

(घ) .................... सत्यं .................... विजयः।

(ङ) .................... गिरयः स्थास्यन्ति पृथिव्यां .................... रामायणकथा प्रचलिष्यन्ति।

(च) .................... जीवः .................... शिवः।

प्रश्न 2 – उचितेन अव्ययपदेन रिक्तस्थानानि पूरयतु।

(क) .................... अहं विद्यालयं नागच्छम्। ( श्वः / ह्यः )

(ख) .................... अहं विद्यालयं गमिष्यामि। ( श्वः / ह्यः )

(ग) .................... शनिवासरः आसीत्। ( श्वः / ह्यः )

(घ) ....................सोमवासरः भविष्यति। ( श्वः / ह्यः )

(ङ) वृक्षस्य .................... वानरः तिष्ठति। ( बहिः / उपरि )

(च) सर्पः विवरात् .................... निर्गच्छति। ( बहिः / उपरि )

(छ) पुत्री जनकेन .................... गच्छति। ( सह / प्रति )

(ज) मोहनः उपवनं .................... गच्छति। ( सह / प्रति )

(झ) जलं .................... पतति। ( उच्चैः / नीचैः )

(ञ) गृहम् .................... वृक्षाः सन्ति। ( अधः / अभितः )

प्रश्न 3 – उचितं विकल्पं चित्वा उत्तरतु।

i. ..................... असौ गृहे न आसीत्।

(क) श्वः (ख) ह्यः

(ग) अद्य (घ) साम्प्रतम्

ii. ..................... सर्वत्र वर्जयेत्।

(क) अति (ख) यत्र

(ग) सदा (घ) उच्चैः

iii. कच्छपः ..................... चलति।

(क) उच्चैः (ख) नीचैः

(ग) शनैः (घ) अधः

iv. ..................... ग्रीष्मऋतुः अस्ति।

(क) अधुना (ख) इदानीम्

(ग) अद्य (घ) साम्प्रतम्

v. बालकाः ..................... क्रीडाक्षेत्रे क्रीडन्ति।

(क) इदानीम् (ख) तदानीम्

(ग) श्वः (घ) ह्यः

vi. अतिथिः ..................... अगच्छत्।

(क) अधुना (ख) ह्यः

(ग) श्वः (घ) इदानीम्

vii. बीजं ..................... फलम्।

(क) यत्र–तत्र (ख) यथा–तथा

(ग) यावत्–तावत् (घ) यदा–तदा

viii. वयम् ..................... पादपान् रोपयाम्।

(क) बहिः (ख) अद्यः

(ग) अपि (घ) उपरि

ix. प्रखरः उद्यानं .................... गच्छति।

(क) सह (ख) प्रति

(ग) बहिः (घ) आसितः

x. यदा लोष्ठं जलात् .................... नागच्छत्।

(क) अद्यः (ख) उपरि

(ग) बहिः (घ) प्रति

xi. षडेते .................... वर्तन्ते .................... देवः सहायकृत्।

(क) यत्र–तत्र (ख) यदा–तदा

(ग) यथा–तथा (घ) यदि–तर्हि

xii. ज्ञानाय दानाय .................... रक्षणाय।

(क) तथा (ख) एवं

(ग) च (घ) वा

xiii. बिलासा बालाबालैः .................... क्रीडति स्म।

(क) प्रति (ख) सह

(ग) समः (घ) अलम्

xiv. .................... इदं श्रेयस्करम् ?

(क) कदा (ख) कुत्र

(ग) क्व (घ) किमर्थम्

xv. .................... मम जन्मदिवसः आसीत्।

(क) अद्य (ख) श्वः

(ग) ह्यः (घ) अधुना

प्रश्न 5 – अधोलिखितम् अनुच्छेदं मञ्जूषातः उचितैः अव्ययपदैः पूरयतु।

(अ) इति, मा, बहिः, यत्र–कुत्र, यावत्, कदापि

नगराद् ............. एकं वनम् अस्ति। तत्र दिनेऽपि ............. अन्धकारः भवति। जनाः प्रायः कुक्कुरेभ्यः रक्षाम् ............. मत्वा एव तत्र प्रविशन्ति। कुक्कुराः जीवान् दृष्ट्वा ............. शब्दं कुर्वन्ति। तच्छ्रुत्वा वन्याः पशवः ............. न आगच्छन्ति। एकाकी एव वने ............. गच्छति।

(ब) यतः, ह्यः, श्वः, कदापि, इति, अतः

सीता ............. अवदत् यत् सा ............. स्वगृहं गमिष्यति। ............. . जनस्य दुरूपयोगः न कर्तव्यः। ............. तस्मै अमृतं कथ्यते। जलं बिना ............. कोऽपि जीवितुं न अर्हति ............. मत्वा जलस्य महत्ता ज्ञातव्या।

प्रश्न 6 – तालिकादत्तपदानि संयुज्य पञ्चवाक्यानि रचयतु।

| | | | |
|---|---|---|---|
| बालकाः | ह्यः | क्रीडाक्षेत्रे | प्राप्नुवन् |
| | श्वः | देशसेवायै अपि | द्रक्ष्यन्ति |
| | इदानीम् | पारितोषिकं | न क्षिपन्तु |
| | यत्र–कुत्र | प्रदर्शिनी | तत्पराः स्युः |
| | यदा–कदा | अवकरं | क्रीडन्ति |
| | कदापि | असत्यं | न वदेयुः |

प्रश्न 7 – अनुच्छेदतः अव्ययपदानि अन्वेषणं कृत्वा लिखतु।

(अ)

श्यामा – मातः! दशमी कक्षा तु मया उत्तीर्णा। न प्रेषयसि मां विद्यालयं साम्प्रतम्। गृहमेव उपविष्टा अहं किं करिष्यामि। देहि मे त्रिंशत्रूप्यकाणि अहं सूचिकर्मणः प्रशिक्षणं प्राप्तुं प्रशिक्षणलयं यास्यामि।

(ब)

चाणक्यः – चन्दनदास! एष एव ते निश्चयः ?

चन्दनदासः – बाढम्, एष एव मे निश्चयः।

चाणक्यः – (स्वगतम्) साधु! चन्दनदास साधु!

प्रश्न 8 – अधोलिखितानि अव्ययपदानि वाक्येषु प्रयोगं कृत्वा लिखत।

बहिः, उपरि, इतस्ततः, कदापि, अद्यः, विना, सर्वत्र, परितः, साम्प्रतम्, अधुना, यावत्–तावत्,। यत्र–तत्र, सह, अन्तरेण, मा, वृथा।

# 5. सन्धि–आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिविच्छेदं कृत्वा वाक्यं पुनः लिखतु।

i. सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम्।

ii. भवान् किं करोति ?

iii. तदुपरान्ते वधूः स्वपितृगृहे गतवती।

iv. सर्वा विद्याः पुरा प्रोक्ता संस्कृते हि महर्षिभिः

v. तस्माद् रोपणमेतेषां रक्षणं च हितावहम्।

vi. कार्तिकेयः षडाननः कथ्यते।

vii. ऋग्वेदः प्रथमः वेदः मन्यते।

viii. सन्तोषः परं सुखम् अस्ति।

ix. सेवकोऽत्र आगच्छति।

x. कश्चिद् बालः रोदति।

प्रश्न 2 – अधोलिखितेषु वाक्येषु कोष्ठकेषु प्रदत्तानि पदानि सन्धिं कुर्वन् वाक्यं पुनः लिखतु।

i. ( शिशुः + अयम् ) मेधावी अस्ति।

ii. उद्याने एकः ( मयूरः + नृत्यति )।

iii. ( पिकः + अपि ) मधुरेण स्वरेण गायति।

iv. एकदा एकस्मिन् वने अनेके ( गजाः + आगच्छन् ) ।

v. अस्मभ्यं सर्वेभ्यः ( सुमनाः + रोचन्ते )।

vi. ' बिलासा बाई केंवटिन' इति ( पुरः + कारः ) प्रतिवर्षं दीयते।

vii. शिवस्य नाम ( दिक् + अम्बरः ) अस्ति।

viii. सज्जनाः यानि–यानि सत्यकार्याणि कुर्वन्ति स ( सत् + आचारः ) अस्ति।

ix. मनः ( चं + चलम् ) अस्ति।

x. कश्चन ( निर्धनः + जनः ) भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्।

प्रश्न 3 – अधोप्रदत्तानि पदानि सन्धि/सन्धिविच्छेद कृत्वा नामापि लिखत।

| | | | |
|---|---|---|---|
| i. | व्याकुलो जातः | = | ................................................ |
| ii. | घटनायाः विषये | = | ................................................ |
| iii. | प्रथमोध्यायः | = | ................................................ |
| iv. | कविर्यच्छति | = | ................................................ |
| v. | प्रातः + गच्छति | = | ................................................ |
| vi. | शिष्याः + ऐते | = | ................................................ |
| vii. | को बुध्यते | = | ................................................ |
| viii. | अयं + कथयति | = | ................................................ |
| ix. | शयितोऽस्मि | = | ................................................ |
| x. | शिरो ब्रह्म | = | ................................................ |
| xi. | द्विवर्षपर्यन्तं समयम् | = | ................................................ |
| xii. | नापुनः + भवम् | = | ................................................ |
| xiii. | विभवञ्च | = | ................................................ |
| xiv. | हंसैर्यथा | = | ................................................ |
| xv. | पुनरसन्तम् | = | ................................................ |
| xvi. | नृपा अत्र | = | ................................................ |
| xvii. | एषः + जयति | = | ................................................ |
| xviii. | वागर्थौ | = | ................................................ |
| xix. | लोकः + तमसा | = | ................................................ |
| xx. | मनसो दमनम् | = | ................................................ |

प्रश्न 4 – अधः प्रदत्तेषु वाक्येषु रेखाङ्कित पदानां सन्धिनाम अवबुध्य लिखतु।

i. अहम् <u>उद्यानं प्रति</u> गच्छामि।

ii. <u>सन्मित्रलक्षणमिदं</u> प्रवदन्ति सन्तः।

iii. अपठद् <u>योऽखिलाः</u> विद्याः।

iv. कः <u>पुनरधन्यो राज्ञो विरूद्ध</u> इति आर्येणावगम्यते ?

v. <u>शस्त्रहता</u> न हि रिपवो भवन्ति।

vi. अयं महापुरूषः <u>शैशवकालादेव</u> मेधावी आसीत्।

vii. अश्वाः कणा <u>गावस्तण्डुला</u> मशकास्तुषाः।

viii. नववस्त्राणि परिधाय <u>लक्ष्मीपूजनं करिष्यामि</u>।

ix. <u>वागीशः</u> सर्वत्र पूजनीयः भवति।

x. हास्यक्षणिकां श्रुत्वा <u>छात्रो हसति</u>।

प्रश्न 5 – अधोलिखितम् अनुच्छेदं पठित्वा सन्धिपदानाम् अन्वेषणं कृत्वा लिखत।

एकस्मिन् वने एकः विशालः वृक्षः आसीत्। तस्मिन् बहवः खगा वसन्ति स्म। एकदा ते अतीव बुभुक्षिताः आसन्। अतः भोजनं खादितुम् इतस्ततः भ्रमन्ति स्म। ते दूराद् दूरं गच्छन्ति स्म।

प्रश्न 6 – अधोलिखितानां सन्धीनां द्वे–द्वे उदाहरणे लिखत।

i. अनुस्वार सन्धिः = 1. .............................. 2. ................................

ii. पर सवर्ण सन्धिः = 1. .............................. 2. ................................

iii. जश्त्व सन्धिः = 1. .............................. 2. ................................

iv. उत्व विसर्ग सन्धिः = 1. .............................. 2. ................................

v. रूत्व विसर्ग सन्धिः = 1. .............................. 2. ................................

vi. सत्व विसर्ग सन्धिः = 1. .............................. 2. ................................

vii. विसर्ग लोप सन्धिः = 1. .............................. 2. ................................

प्रश्न 7 – विकल्पेभ्यः उचितं विकल्पं चित्वा लिखतु।

i. 'सुबन्तः' पदे सन्धिः अस्ति।

(क) अनुस्वार (ख) पर सवर्ण

(ग) जश्त्व (घ) सत्व विसर्गः

ii. 'नदीम् + तरति' अनयोः सन्धिपदम् अस्ति।

(क) नदींतरति (ख) नदीतरति

(ग) नदीम्तरति (घ) नदीन्तरति

iii. 'यदुक्तम्' पदे सन्धिः अस्ति।

(क) जश्त्व (ख) अनुस्वार

(ग) पर सवर्ण (घ) विसर्ग लोप

iv. 'प्रथमोऽध्यायः' इति पदस्य सन्धिविच्छेदम् अस्ति।

(क) प्रथम+अध्यायः (ख) प्रथमः+अध्यायः

(ग) प्रथमो+अध्यायः (घ) प्रथमा+अध्यायः

v. भारतः अस्माकं देशः + अस्ति।

(क) देशास्ति (ख) देशोस्ति

(ग) देशोऽस्ति (घ) देशवो अस्ति

vi. 'प्रज्ञा कुलञ्च विभक्ञ्च <u>यशश्च</u> हन्ति। रेखांङ्कित पदे सन्धि अस्ति।

(क) जश्त्व (ख) शत्व

(ग) अनुस्वार (घ) पर सवर्ण

vii. 'किञ्चिदानम्राः' पदे सन्धिच्छेदः अस्ति।

(क) किम्+चिदानम्राः (ख) किञ्चित्+आनम्राः

(ग) किञ्चिद्+आनमाः (घ) किञ्चिदा+नम्राः

viii. 'सन्मित्रम' पदस्य सन्धिच्छेदः अस्ति।

(क) सत्+मित्रम (ख) सम्+मित्रम्

(ग) सन्+मित्रम् (घ) सं+मित्रम्

ix. जश्त्व सन्धेः उदाहरणम् अस्ति।

(क) अजन्तः (ख) कश्चित्

(ग) रामश्शेते (घ) यशोगानम्

x. उत्व विसर्ग सन्धेः उदाहरणम् अस्ति।

(क) सर्वेऽपि (ख) कोऽपि

(ग) देवो गच्छति (घ) शिशुर्रोदति

प्रश्न 8 – सुमेलनं करोतु।

| (क) | (ख) | सुमेलनम् |
|---|---|---|
| सञ्जयः | जश्त्व | ........................ |
| नमस्कारः | पर सवर्ण | ........................ |
| रविरूदेति | उत्व विसर्ग | ........................ |
| सदाचारः | सत्व विसर्ग | ........................ |
| रामोऽत्र | रूत्व विसर्ग | ........................ |

प्रश्न 9 – रिक्तस्थानानि पूरयत।

| | | | | | | |
|---|---|---|---|---|---|---|
| i. | .................. | + | अन्तः | = | अजन्तः |
| ii. | पितुः | + | आज्ञा | = | .................. |
| iii. | सिंहः | + | अपि | = | .................. |
| iv. | अं | + | कितः | = | .................. |
| v. | .................. | + | .................. | = | विमलं जलम् |
| vi. | .................. | + | श्रोत्रियः | = | केनस्विच्छोत्रियः |
| vii. | .................. | + | .................. | = | मनसो दमनम् |
| viii. | .................. | + | विपरीतम् | = | साधोर्विपरीतम् |
| ix. | गोभिः | + | .................. | = | गोभिस्तुरगाः |
| x. | .................. | + | ऋतवः | = | षड्ऋतवः |

CBSE

# 6. समास–आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समासविग्रहं कृत्वा वाक्यानि पुनः लिखत।

i. संस्कृतम् इति मम प्रियविषयः।

ii. जलपातेन लोष्ठं गतितं जातम्।

iii. निन्दतु नीतिनिपुणाः यदि वा स्तुवन्तु।

iv. तौ अरपानद्याः तटे अतिष्ठताम्।

v. वैद्यनापितहन्तॄणां हस्तेषु क्षुरिका यथा।

vi. नास्ति त्यागसमं सुखम्।

vii. अयं महापुरूषः शैशव–कालादेव मेधावी आसीत्।

viii. ज्वरपीड़ितः मोहनः पर्यङ्के शयानोऽस्ति।

ix. तस्य मृतशरीरं राजमार्गं निकषा वर्तते।

x. भारतीयानां दृष्टिः इसरोसंस्थायाः मङ्गलकार्यक्रमे आसीत्।

xi. बालकः प्रतिदिनं उद्याने विहरति।

xii. सचित्रं पुस्तकम् आनय।

xiii. श्वेताम्बरा अत्र विराजते।

xiv. पीतदुग्धः बालं प्रसन्नः अस्ति।

xv. झलमला उपबालोदनगरम् स्थिता।

प्रश्न 2 – अधोलिखितेषु वाक्येषु रेखाङ्किकतपदानि समासं कृत्वा वाक्यानि पुनः लिखतु।

i. वृक्षस्य समीपम् एका नदी वहति।

ii. ''बहुनि फलानि यस्मिन् सः'' वृक्षः उद्याने शोभते।

iii. तौ पतिः च पत्नी च गुरोराश्रमं जग्मतुः।

iv. अस्माकं माता च पिता च पूजनीयौ स्तः।

v. बालकः हस्तौ च पादौ च एतेषां समाहारः प्रक्षाल्य भोजनं खादति।

vi. सताम् न आदरं न करणीयम्।

vii. श्रीगणेशः लम्बम् उदरम् यस्य सः कथ्यते।

viii. शकुन्तला सुन्दरी नारी आसीत्।

ix. विकसितं पङ्कजं सरः दृष्टवा कः न प्रसीदति ?

x. वयं परिश्रमं कुर्मः विघ्नानाम् अभावः च जीवामः।

प्रश्न 3 – समासं/समासविग्रहं कृत्वा नामापि लिखतु।

i. चन्द्रमुखम् = ............................ ....................................

ii. चन्द्र इव मुखं यस्याः सा = ............................ ....................................

iii. वृक्षारूढ़ः = ............................ ....................................

iv. आरूढवृक्षः = ............................ ....................................

v. चक्रं पाणौ यस्य सः = ............................ ....................................

vi. बालिका च बालकः च = ............................ ....................................

vii. गोव्याध्रम् = ............................ ....................................

viii. पञ्चवटी = ............................ ....................................

ix. पञ्चानां पात्राणां समाहारः= ............................ ....................................

x. त्रिपथम् = ............................ ....................................

xi. अनर्थः = ............................ ....................................

xii. महान् ज्ञानी = ............................ ....................................

xiii. पुरूषः एव व्याघ्रः = ............................ ....................................

xiv. शं करोति इति = ............................ ....................................

xv. विद्यालयः = ............................ ....................................

xvi. शास्त्रप्रवीणः = ............................ ....................................

प्रश्न 4 – अधः प्रदत्तेषु वाक्येषु रेखाङ्कितपदानां केवलं समासनाम लिखतु।

i. अहं रायपुरनगरात् आगच्छामि।

ii. संस्कृतं तु मम प्रियविषयः।

iii. स भारवेदनया क्रन्दति स्म।

iv. स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्।

v. अहं तु नववस्त्राणि परिधाय लक्ष्मीपूजनं करिष्यामि।

vi. अद्य मां भृशं शिरोवेदना बाधते।

vii. तदुपरान्ते वधूः स्वपितृगृहे गतवती।

viii. आपद्गतं न जहाति।

ix. मनःपूतं समाचरेत्।

x. पुत्रः पित्रोः चरणौ प्रणमति।

xi. सोहनस्य पिता कुम्भकारः अस्ति।

xii. सताम् अनादरः कदापि न कुर्युः।

xiii. यथाशक्ति दानं कर्तव्यम्।

xiv. बालदेवो भव।

xv. रावणः एव दशाननः कथ्यते।

प्रश्न 5 – समासविग्रहं/समस्तपददृष्ट्या शुद्धं विकल्पं चित्वा उत्तरतु।

i. बालकः <u>विकलाङ्गो</u> भूत्वा दुःखी अभवत्।

(क) विकलम् अङ्गं येन सः (ख) विकलम् अङ्गं यः सः

(ग) विकलम् अङ्गं यस्य सः (घ) विकलम् अङ्गं यं सः

ii. तस्य पिता <u>विद्याधनः</u> अस्ति।

(क) विद्या एव धनं यस्य सः (ख) विद्यां धनं यस्य सः

(ग) विद्या एव धनं येन सः (घ) विद्या धनं यस्मिन् सः

iii. अस्माकं <u>पितरौ</u> पूजनीयौ स्तः।

(क) माता च पिता च (ख) पिता च माता च

(ग) पिता च पिता च (घ) मातृ च पितृ च

iv. <u>बालकाः</u> उद्याने विचरन्ति।

(क) बालकः च बालकः च (ख) बालकः च बालकः च बालकः च

(ग) बालिका च बालकः च (घ) बालकाः च बालिकाः च

v. काकः <u>कृष्णवर्णः</u> भवति।

(क) कृष्णः वर्णः (ख) कृष्णः वर्णः यस्य सः

(ग) कृष्णं वर्णं यस्य सः (घ) कृष्णः च वर्णः च

vi. काकः <u>कृष्णवर्णः</u> भवति।

(क) द्वन्द्व : (ख) कर्मधारयः

(ग) बहुव्रीहिः (घ) द्विगुः

vii. बस्तरे <u>दर्शनीयानि स्थलानि</u> सन्ति।

(क) दर्शनीय स्थलानि (ख) दर्शनीस्थलानि

(ग) दर्शन स्थलानि (घ) दर्शनीयस्थान

viii. विषधरः <u>भयङ्करः</u> आसीत्।

(क) तत्पुरूष समासः (ख) नञ् तत्पुरूष समासः

(ग) उपपद तत्पुरूष समासः (घ) कर्मधारय समासः

ix. वाराणसी गङ्गायाः समीपं स्थिता।

(क) उपगङ्गम् (ख) गङ्गासमीपम्

(ग) उपगङ्गा (घ) उपगङ्गः

x. उद्यानपालः प्रतिदिनं पादपान् जलेन सिञ्चति।

(क) दिने दिने (ख) प्रति प्रति दिनम्

(ग) दिनं प्रति (घ) प्रति दिनं

xi. 'श्वेतम् अम्बरं यस्या सा' इति कथ्यते।

(क) दुर्गा (ख) सरस्वती

(ग) पार्वती (घ) लक्ष्मी

xii. वने पशवः पक्षिणः च निवसन्ति।

(क) पशुपक्षी (ख) पशुपक्षिणः

(ग) पशुपक्षिणौ (घ) पशवः पक्षिणः

xiii. मासान्ते कक्षापाञ्चिकायाः मम नाम कर्तिष्यति।

(क) कर्मधारयः (ख) तत्पुरूषः

(ग) द्वन्द्वः (घ) बहुव्रीहिः

xiv. कर्मधारय समासस्य उदारहणम् अस्ति।

(क) वीणापाणिः (ख) जलदः

(ग) दानवीरः (घ) महाकविः

xv. अहं दशम्यां कक्षायां पठामि।

(क) दशमीकक्षायाम् (ख) दशमकक्षायाम्

(ग) दशकक्षायाम् (घ) दशमी कक्षायाम्

xvi. 'अनर्थः' अस्य समासविग्रहः अस्ति।

(क) अ नर्थः (ख) न अर्थः

(ग) अन् अर्थः (घ) कोई नहीं

xvii. 'पङ्के जायते इति' अस्य समासः अस्ति।

(क) पङ्कजम्   (ख) पङ्कजः

(ग) पङ्कजा   (घ) पङ्केजा

xviii. उमेशस्य ग्रामः <u>यमुनायाः समीपम्</u> अस्ति।

(क) यमुनासमीपम्   (ख) उपयमुना

(ग) उपयमुनम्   (घ) उपयमुनायाः

xix. एषा पञ्चानां वटानां समाहारः अस्ति।

(क) पञ्चवटी   (ख) पञ्वटम्

(ग) पञ्वटः   (घ) पञ्वटाः

xx. 'बिलासा–चतुष्पथम्' इति स्थानं बिलासपुरे अस्ति।

(क) चतुर्णां पन्थानां समाहारः   (ख) चतुर्णां पथानां समाहारः

(ग) चतुर्णां पथाम् समाहारः   (घ) चत्वारः पथानां समाहारः

प्रश्न 6 – सामासिकपदानि समासनामानि च अधः एतेषां सुमेलनं कुरुत –

| (क) | (ख) | सुमेलनम् |
|---|---|---|
| अविद्या | तत्पुरूषः | .................. |
| अरपानद्याः | द्वन्द्वः | .................. |
| त्रिलोकी | अव्ययीभाव : | .................. |
| अहर्निशम् | कर्मधारयः | .................. |
| आरूढवृक्षः | द्विगुः | .................. |
| सुन्दरनारी | नञ् तत्पुरूषः | .................. |
| यथाकामम् | बहुव्रीहिः | .................. |

प्रश्न 7 – अधः प्रदत्तातालिकानुसारं वर्गीकरणं कुरुत ।

पापमुक्तः, महाज्ञानी, त्रिभुवनम्, अनुहरि, लम्बोदरम्, गोव्याध्रम, पीतदुग्धा, कन्यके, चन्द्रमुखम्, सप्ताहः, निर्जलम्, चन्द्रमुखी, चन्द्रशेखरः, सूर्योदयः, यथासमयम्, पञ्चपात्रम्, तौ, पञ्चमूली, पतितपर्णः, वृक्षारूढः, कूपपतितः, लोकनृत्यगीतयोः, नीतिनिपुणाः, मातृदेवः

| अव्ययीभाव : | तत्पुरूषः | कर्मधारयः | द्वन्द्वः | द्विगुः | बहुव्रीहिः |
|---|---|---|---|---|---|
| ________ | ________ | ________ | ________ | ________ | ________ |
| ________ | ________ | ________ | ________ | ________ | ________ |
| ________ | ________ | ________ | ________ | ________ | ________ |
| ________ | ________ | ________ | ________ | ________ | ________ |
| ________ | ________ | ________ | ________ | ________ | ________ |

# 7. प्रत्यय–आधारिताः प्रश्नाः

## कृत् – प्रत्ययाः

प्रश्न 1 – शतृ/शानच्/क्त्वा/ल्यप् प्रत्ययान् प्रयोगं कृत्वा वाक्ययुग्मं एकीकृतं कृत्वा रचयत।

उदारहणम् – बालः पठति। बालः लिखति।

(क) शतृ प्रत्यय प्रयोगेन – पठन् बालः लिखति।

(ख) क्त्वा प्रत्यय प्रयोगेन – बालः पठित्वा लिखति।

i. महिलाः गायन्ति। महिलाः नृत्यन्ति।

ii. बालौ पठतः। बालौ लिखतः।

iii. मेघाः गर्जन्ति। मेघाः वर्षन्ति।

iv. शिष्यः विद्यालयं प्रविशति। शिष्यः गुरूं प्रणमति।

v. वानरः वृक्षम् आरोहति। सः जम्बुफलानि खादति।

vi. महिला हास्यकथां श्रृणोति। सा उच्चैः हसति।

vii. वायुयाने आकाशं गच्छतः। वायुयाने आकाशे उड्डयतः।

viii. चटका कूजति। चटका उड्डयति।

प्रश्न 2 – कृत् प्रत्ययाधारितानि रिक्तस्थानानि पूरयत।

i. .................. + .................. = दृष्टः

ii. .................. + .................. = धावन्

iii. सेव् + .................. = सेवमानम्

iv. .................. + शानच् = वर्धमानम्

v. खाद् + क्त्वा = ..................

| | | | | | | |
|---|---|---|---|---|---|---|
| vi. | .................. | + | .................. | = | त्यक्तवान् |
| vii. | श्रु | + | .................. | = | श्रुतवान् |
| viii. | .................. | + | क्त्वा | = | नर्तित्वा |
| ix. | स्ना | + | तुमुन् | = | .................. |
| x. | प्र + नम् | + | .................. | = | प्रणम्य |

प्रश्न 3 – अधोलिखितानां कृदन्तपदानां धातु–प्रत्ययौ पृथक् कुरुत।

(क) नत्वा (ख) पक्ववान् (ग) चलत् (घ) वर्तमानः
(ङ) वन्दमानः (च) शयितः (छ) भिन्नः (ज) कर्तुम्
(झ) प्रविश्य (ञ) योद्धुम् (त) क्षिप्त्वा (थ) पृष्टः
(द) वदन् (ध) आनीतवान् (न) लिखितवान्

प्रश्न 4 – रेखाङ्कितपदानां मूलधातुः प्रत्ययः च पृथक्–पृथक् लिखतु।

i. नीरजेन पत्रं लिखितम्।
ii. जनकः धर्मपुरे राज्यं कृतवान्।
iii. पुरस्कारं लभमाने कन्ये प्रसीदतः।
iv. पतन्ती फलानि मालाकारः चिनोति।
v. सुप्तां कन्यां न जागृयात्।
vi. राज्ञा ब्राह्मणः निमन्त्रितः।
vii. कक्षायां छात्राः गीतां पठितवन्तः।
viii. सुरेशः आपणं गत्वा फलानि आनयति।
ix. व्यायामं कर्तुं जनाः उद्यानं गच्छन्ति।
x. अहं पठितुं वाचनालयं गच्छामि।

प्रश्न 5 – उचितं विकल्पं चित्वा उत्तरतु।

i. प्रदीपः सामान्यज्ञानं पठितुम् इच्छति।

(क) पठ् + तुम (ख) पठ् + तुमुन्

(ग) पठि + तुम् (घ) पठितु + म्

ii. मया लेखः लिखितः।

(क) लिख् + तः (ख) लिख् + इतः

(ग) लिख् + क्त (घ) लिखि + तः

iii. वयं प्रातःकाले क्रीडाक्षेत्रे मिल्+क्त्वा क्रीडामः।

(क) मिलित्वा (ख) मिलिक्त्वा

(ग) मिलत्वा (घ) मिलितः

iv. वानरः क्रुध्वा आक्रमणं कृतवान्।

(क) क्रुध् + वा (ख) क्रुध् + त्वा

(ग) क्रुध् + क्त्वा (घ) कोई नहीं

v. छात्रावासे वर्तमाना छात्रा महाविद्यालये पठति।

(क) वर्त् + माना (ख) वृत् + माना

(ग) वृत् + शानच् (घ) वर्त् + शानच्

vi. शीला एकां कथां कथयितुं इच्छति।

(क) कथय + तुमुन् (ख) कथ् + तुमुन्

(ग) कथयि + तुम् (घ) कथय + इतुम्

vii. बालिकाः नृत्+तुमुन् तत्पराः सन्ति।

(क) नर्तुम् (ख) नर्तितुम्

(ग) नर्तित्वा (घ) नृत्वा

viii. वने सिंहः एकं मृगं भक्षयित्वा तुष्टः अभवत्।

(क) भक्ष् + त्वा (ख) भक्ष् + क्त्वा

(ग) भक्षयि + त्वा (घ) भक्षयि + क्त्वा

ix. विद्यालयात् मार्गे क्रीड्+शतृ बालकाः गृहं गच्छन्ति।

(क) क्रीडन् (ख) क्रीडन्तः

(ग) क्रीडन्तौ (घ) क्रीडन्ताः

x. बालः उदित्वा रोदति।

(क) उद् + क्त्वा (ख) उत् + क्त्वा

(ग) वद् + क्त्वा (घ) वद् + त्वा

xi. वानरेण फले त्रोटिते।

(क) त्रो + क्त (ख) त्रोट् + क्त

(ग) त्रुट् + क्त (घ) त्रुट् + त

xii. भवतः पायसः मह्यम् अतीव रूचितवान्।

(क) रूच् + तवत् (ख) रूच् + क्तवतु

(ग) रूचित् + वत् (घ) रूच् + क्त

प्रश्न 6 – 'तुमुन' प्रत्ययस्य प्रयोगेन वाक्ययुग्मं संयुज्य एकम् वाक्यं रचयतु।

i. धेनुः क्षेत्रं गच्छति। धेनुः तृणानि चरति।

यथा–तृणानि चरितुं धेनु क्षेत्रं गच्छति।

ii. सरला मन्दिरं गच्छति। तत्र सा रामायणं पठति।

iii. मार्जारः धावति। सः मूषकं ग्रहणाति।

iv. सुरेशः उद्याने गच्छति। सः तत्र व्यायामं करोति।

v. बालः विद्यालयं गच्छति। सः पाठं पठति।

vi. मेघाः गर्जन्ति। मेघाः वर्षन्ति।

# तद्धित–प्रत्ययाः

प्रश्न 1 – रेखाङ्कितपदनां प्रकृतिः प्रत्ययश्च पृथक् कृत्वा वाक्यानि पुनः लिखत।

i. मनुष्यः सामाजिकः प्राणी अस्ति।

ii. मनुष्यत्वं कदापि न त्यज।

iii. अहं भारतस्य नागरिकः अस्मि।

iv. गुरोः गुरूत्वं वर्णयितुं कः समर्थः ?

v. भरतस्य भ्रातृत्वं सर्वत्र प्रशंसनीयम्।

vi. रविवासरे साप्ताहिकः अवकाशः भवति।

vii. दैनिकं कार्यं मया सम्पन्नम्।

viii. अत्र धार्मिकः उत्सवः भवति।

ix. चाणकस्य विद्वत्त्वं को न जानाति।

x. रामस्य शूरत्वं सर्वे प्रशंसन्ति।

प्रश्न 2 – रेखाङ्कित प्रकृतिप्रत्ययौ संयुज्य नवीनपदनिर्माणं कृत्वा वाक्यानि पुनः लिखत।

i. अद्यत्वे उद्योग + ठक् विकासः सर्वत्र दृश्यते।

ii. पर्यावरण–रक्षणम् अस्माकं नीति + ठक् कर्तव्यम् अस्ति।

iii. अयं वेद + ठक् विद्वान् अस्ति।

iv. अग्नेः उष्ण + तल् शीतकाले अतीव रोचते।

v. निर्धन + तल् दुःखदायिनी भवति।

vi. गृहस्य स्वच्छ + तल् आनन्ददायिनी भवति।

vii. प्रकृतेः रमणीय + तल् मनोरमा भवति।

viii. मनसः चञ्चल + तल् दुखस्य कारणं भवति।

ix. राज्ञः राजन् + त्व प्रजां प्रति हितकरं भवेत्।

x. पुस्तकानां महत् + त्व कदापि न न्यूनं भवति।

प्रश्न 3 – उचितं विशेष्यपदं चित्वा रिक्तस्थानानि पूरयत।

i. .................. नाटकम् ( ऐतिहासिकम् / ऐतिहासिकः )

ii. .................. उपदेशः ( नैतिकः / नैतिकम् )

iii. .................. परीक्षा ( मासिकम् / मासिकी )

iv. .................. दृश्यम् ( प्राकृतिकं / प्राकृतिकः )

v. .................. विद्या ( आध्यात्मिकी / आध्यात्मिकः )

vi. .................. मङ्गलाचरणम् ( पौराणिकाः / पौराणिकम् )

vii. .................. उपन्यासः ( काल्पनिकः / काल्पनिकी )

viii. .................. विद्वान् ( वैदिकः / वैदिकी )

# स्त्री–प्रत्ययाः

प्रश्न 1 – अधोलिखितेषु वाक्येषु कोष्ठके दत्तान् प्रकृतिप्रत्ययान् संयुज्य पदनिर्माणं कृत्वा वाक्यानि पुनः लिखत।

i. ( श्रीमत् + ङीप् ) .................. हेमा नाट्योत्सवे दीपं प्रज्वालयति।

ii. ( कुमार + ङीप् ) ..................वंदना तस्याः पुष्पगुच्छैः स्वागतं करोति।

iii. एका ( किशोर + ङीप् ) .................. भरतनाट्यं प्रस्तौति।

iv. ( मनोहारिन् + ङीप् ) .................. एषा नाट्य प्रस्तुतिः।

v. ( मधुर + टाप् ) .................. वाणी प्रीणयति मनः।

vi. प्रभा पठने ( प्रवीण + टाप् ) .................. अस्ति।

vii. तस्याः माता ( चिकित्सक + टाप् ) .................. अस्ति।

viii. सा समाजस्य ( सेवक + टाप् ) .................. अपि अस्ति।

ix. ( नैतिक + ङीप् ) .................. शिक्षा आवश्यकी साम्प्रतम्।

x. बालः ( बाल + टाप् ) .................. च उदयन्तं भास्करं प्रणमतः

प्रश्न 2 – रेखाङ्कितपदानां प्रकृतिप्रत्ययौ पृथक् कृत्वा वाक्यं पुनः लिखतु।

i. शिष्यः <u>शिष्या</u> च लताः जनेन सिञ्चति।

ii. अमृतजला इयं गङ्गा <u>पवित्रा</u>।

iii. सत्सङ्गतिः सर्वत्र <u>दुर्लभाः</u>।

iv. नैतिकी शिक्षा <u>आवश्यकी</u>।

v. सतां बुद्धिः <u>हितकारिणी</u> भवति।

vi. <u>लौकिकी</u> उन्नतिः यशः वर्धयति।

vii. <u>जीवनदात्री</u> प्रकृतिः रमणीया सदा।

viii. <u>गायन्ती</u> बालिका नृत्यति।

प्रश्न 3 – प्रकृतिप्रत्ययौ योजयित्वा स्त्रीलिङ्गशब्दान् रचयतु।

| | | | | | | |
|---|---|---|---|---|---|---|
| i. | तरूण | + | ङीप् | = | ........................ |
| ii. | त्रिलोक | + | ङीप् | = | ........................ |
| iii. | तपस्विन् | + | ङीप् | = | ........................ |
| iv. | भवत् | + | ङीप् | = | ........................ |
| v. | गच्छत् | + | ङीप् | = | ........................ |
| vi. | पश्यत् | + | ङीप् | = | ........................ |
| vii. | कुर्वत् | + | ङीप् | = | ........................ |
| viii. | बालक | + | टाप् | = | ........................ |
| ix. | नर्तक | + | ङीप् | = | ........................ |
| x. | गायक | + | टाप् | = | ........................ |
| xi. | अज | + | टाप् | = | ........................ |
| xii. | नद् | + | ङीप् | = | ........................ |

प्रश्न 4 – शुद्धं विकल्पंप चित्वा उत्तरत।

i. विपुला च अत्र वनसम्पदा।

(क) विपुल + टाप्　　(ख) विपुल + आङ्

(ग) विपुल + आप्　　(घ) विपुल + आ

ii. कीदृशी तव मैत्री ?

(क) कीदृश् + ई　　(ख) कीदृश् + ङीप्

(ग) कीदृक् + ङीप्　　(घ) कीदृश + ङीप्

iii. क्रूरता सदैव निन्दनीया एव।

(क) क्रू + तल् (ख) क्रूर + तल्

(ग) क्रू + त्व (घ) क्रूर् +तल्

iv. सा स्वभावेन सरल + टाप् अस्ति।

(क) सरलता (ख) सरला

(ग) सरलतम् (घ) सरलटा

v. मयूरस्य मनोहारिणी शोभा सर्वेभ्यः रोचते।

(क) मनोहर + ङीप् (ख) मनोहारिन् + ई

(ग) मनोहारिण +ङीप् (घ) मनोहरन्+ङीप्

vi. कियती प्राचीना इयं सृष्टिः।

(क) कियत् + ई (ख) कियत + ई

(ग) कियत् + ङीप् (घ) कियत + ङीप्

# 8. कारक–विभक्ति आधारिता: प्रश्ना:

प्रश्न 1 – उचितेन पदेन रिक्तस्थानानि पूरयतु।

i. क्रुध् ईर्ष्य् रूच दा दद् धातूनां योगे कर्मकारकस्य ........................ उपपदविभक्तिः भवति।

ii. भी त्रस् प्र + भू धातूनां योगे कर्मकारकस्य ........................ उपपदविभक्तिः भवति।

iii. स्निह् अभिलष् धातयोः योगे कर्मकारकस्य ........................ उपपदविभक्तिः भवति।

iv. 'सह साकं सार्धं समं' योगे ........................ उपपदविभक्तिः भवति।

v. हा प्रति निकषा अव्ययानां योगे ........................ उपपदविभक्तिः भवति।

प्रश्न 2 – उचितं विकल्पं चित्वा उत्तरतु।

i. 'नमः स्वस्तिस्वधास्वाहावषड्' योगे विभक्तिः भवति।

(क) द्वितीया (ख) तृतीया

(ग) चतुर्थी (घ) सप्तमी

ii. श्यामा ........................ बहिः गच्छति।

(क) कक्षात् (ख) कक्षया

(ग) कक्षायाः (घ) कक्षायाम्

iii. ........................ समया नदी प्रवहति।

(क) ग्रामस्य (ख) ग्रामं

(ग) ग्रामेण (घ) ग्रामे

iv. बालिका ........................ सार्धं विद्यालयं गतवती।

(क) शिक्षिकाम् (ख) शिक्षिकया

(ग) शिक्षिकायै (घ) शिक्षिकायाः

v. पिता ........................ क्रुध्यति।

(क) पुत्रम् (ख) पुत्रे

(ग) पुत्राय (घ) पुत्रेण

vi. समः उपदेशकः नास्ति।

(क) कृष्णेन (ख) कृष्णस्य

(ग) कृष्णः (घ) कृष्णम्

vii. ताः नृत्ये प्रवीणाः सन्ति।

(क) प्रथमा उपपद (ख) तृतीया उपपद

(ग) पञ्चमी उपपद (घ) सप्तमी उपपद

viii. मनु विद्यालयं ........................ गच्छति।

(क) सह (ख) प्रति

(ग) सदृशः (घ) समम्

ix. धनात् ........................ न सुखम्।

(क) प्रति (ख) साकम्

(ग) ऋते (घ) अलम्

x. अहं गमनाय अलम् अस्मि।

(क) द्वितीय उपपद (ख) तृतीया उपपद

(ग) चतुर्थी उपपद (घ) पञ्चमी उपपद

प्रश्न 3 – सुमेलनं कुरूत।

| (क) | (ख) | सुमेलनम् |
|---|---|---|
| हा प्रति | चतुर्थी उपपद | .................... |
| साकं सार्धम् | सप्तमी उपपद | .................... |
| नमः अलम् | पञ्चमी उपपद | .................... |
| ऋते विना | द्वितीया उपपद | .................... |
| कुशलः प्रवीणः | तृतीया उपपद | .................... |

CBSE

# 9. वाच्य–आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखितानां वाक्यानां वाच्यमवबुध्य नाम लिखत।

i. त्वया अहं दृश्ये। ....................................................

ii. बाला दुग्धं पिबति। ....................................................

iii. त्वं गीतं गीतवान्। ....................................................

iv. बालकेन क्रीड्यते। ....................................................

v. अहं सूर्यं पश्यामि। ....................................................

vi. श्रद्धया अत्र स्थीयते। ....................................................

vii. सूर्यांशः पाठं पठति। ....................................................

viii. बालेन हस्यते। ....................................................

ix. कन्याभिः हस्यते। ....................................................

x. त्वया पुष्पाणि चीयन्ते। ....................................................

xi. अहं प्रश्नपत्रं रचयामि। ....................................................

xii. अनुजः पाठं पठति। ....................................................

xiii. अनुजेन पाठं पठ्यते। ....................................................

xiv. रमया भोजनं पच्यते। ....................................................

xv. सा भोजनं खादति। ....................................................

xvi. शिशुना सुप्यते। ....................................................

xvii. भक्तेन गीता पठ्यते। ....................................................

xviii. मया लोभः त्यज्यते। ....................................................

xix. वयं चन्द्रमसं ध्यायामः। ....................................................

xx. शिष्याः गुरून् नमन्ति। ............................................................

xxi. मया त्वं दृश्यसे। ............................................................

xxii. बालकेन कन्दुकेन क्रीड्यते। ............................................................

xxiii. त्वया कविता श्रूयते। ............................................................

xxiv. बालकः वृक्षान् गणयति। ............................................................

xxv. बालकेन घटः पूर्यते। ............................................................

xxvi. बालः कन्दुकेन क्रीडति। ............................................................

xxvii. पुत्र जनकं सेवते। ............................................................

xxviii. मेघैः जलं वृष्यते। ............................................................

xxix. तेन यूयं दृश्यध्वे। ............................................................

xxx. त्वं पुरस्कारं गृह्णासि। ............................................................

प्रश्न 2 – अधोलिखितानां वाक्यानाम् अवबुध्य वाच्यपरिवर्तनं करोतु।

i. अश्वैः धाव्यते। ....................................................

ii. भक्तः गीतां पठति। ....................................................

iii. त्वं पुष्पाणि चिनोति। ....................................................

iv. अस्माभिः चन्द्रमाः ध्यायते। ....................................................

v. रमा भोजनं पचति। ....................................................

vi. अहं लोभं त्यजामि। ....................................................

vii. शिष्यैः गुरवः नम्यन्ते। ....................................................

viii. आवां गीतं गायावः। ....................................................

ix. अहं तु विस्मृवान्। ....................................................

x. सिंहः वने गर्जति। ....................................................

प्रश्न 3 – उपयुक्तपदैः रिक्तस्थानानि पूरयत।

i. त्वया कविता .................... । ( श्रृणोति / श्रूयते )

ii. शिष्याः गुरून् .................... । ( नमन्ति / नम्यन्ते )

iii. जनैः प्रदर्शनी .................... । ( पश्यन्ति / दृश्यते )

iv. आचार्यः छात्रान् .................... । ( उपदिशति / उपदिश्यन्ते )

v. विमानेन .................... । ( उड्डीयते / उड्डयते )

vi. .................... दशमकक्षायां पठ्यते। ( अहं / मया )

vii. .................... रोदति। ( शिशुः / शिशुना )

viii. .................... दिने सूप्यते। ( अलसः / अलसेन )

ix. सुधया प्रतिदिनं .................... खाद्यते। ( कदलीफलं / कदलीफले )

x. दिनेशः .................... लिखति। ( निबन्धः / निबन्धम् )

प्रश्न 4 – शुद्धं विकल्पं चित्वा लिखत।

i. 'अश्वाः क्षेत्रे धावन्ति' वाक्यम् अस्ति।

(क) कर्तृवाच्ये (ख) कर्मवाच्ये

(ग) भाववाच्ये (घ) किमपि न

ii. कर्मवाच्ये कर्तुः .................... विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) षष्ठी

iii. कर्तृवाच्ये कर्मपदस्य .................... विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

iv. कर्मवाच्ये कर्मपदस्य .................... विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

v. कर्तृवाच्ये कर्तुः .................... विभक्तिः भवति।

(क) प्रथमा (ख) द्वितीया

(ग) तृतीया (घ) चतुर्थी

vi. 'बालकेन कन्दुकेन क्रीडयते' वाक्ये कर्मपदम् अस्ति।

(क) बालकेन (ख) कन्दुकेन

(ग) क्रीड्यते (घ) कर्मपदं नास्ति

vii. बालकाः फलानि .................... ।

(क) खादति (ख) खादन्ति

(ग) खाद्यते (घ) खाद्यन्ते

viii. त्वया वृक्षाः .................... ।

(क) गणयति (ख) गणयन्ति

(ग) गण्यते (घ) गण्यन्ते

ix. .................... गुरूः वन्द्यते।

(क) अहम् (ख) मया

(ग) वयम् (घ) आवाम्

x. बालेन .................... दृश्यते।

(क) धेनुः (ख) धेनुम्

(ग) धेन्वा (घ) धेनवे

प्रश्न 5 – अधोलिखितानि क्रियापदानि कर्मवाच्यरूपेषु परिवर्तयतु।

(क) गच्छन्ति (ख) पश्यामि (ग) पठसि (घ) क्रीडति

(ङ) लिखामः (च) वदन्ति (छ) श्रृणोति (ज) नमावः

(झ) सेवामहे (ञ) वर्तते (त) धावथः (थ) तिष्ठतः

(द) गायावः (ध) स्वपिति (न) क्रुध्यथ

# 10. अशुद्धि शोधनम्

प्रश्न 1 – अधोलिखितेषु वाक्येषु अशुद्धपदानाम् अन्वेषणं कृत्वा तेषां शोधनं च कृत्वा वाक्यानि पुनः लिखतु (वाक्यशोधनं करोतु।)

i. अहम् अध्ययनं कृत्वा खादसि।
ii. त्रयः बालकाः पठति।
iii. सा छात्रा श्वः विद्यालयं अगच्छत्।
iv. सुशीलः पुस्तकं पठितवती।
v. भवान् कुत्र गच्छन्ति ?
vi. अहं श्वः अगच्छम्।
vii. रामः कुत्र गच्छन्ति ?
viii. बालिका विद्यालयं गतवान्।
ix. अहं गृहं गच्छति।
x. ग्रामस्य समया नदी प्रवहति।
xi. छात्रः शिक्षकस्य सह पठति।
xii. लोभस्य सदृशः पापं नास्ति।
xiii. अग्निं स्वाहा।
xiv. स निर्धनं वस्त्रं ददाति।
xv. ग्रामस्य बहिः सरः अस्ति।
xvi. हा नास्तिक।
xvii. श्री गुरूं नमः।
xviii. धनस्य ऋते सुखं नास्ति।
xix. अयं कन्या चतुरा अस्ति।
xx. पयः मधुरः अस्ति।

प्रश्न 2 – अधोलिखितेषु वाक्येषु रेखाङ्कितपदान् शोधयित्वा वाक्यानि पुनः लिखतु (पदशोधनं करोतु)।

i. वयं कुत्र गच्छथ ?
ii. इयं कन्या गुणवान् अस्ति।
iii. अहं ह्यः गमिष्यामि।
iv. वयं भारतीयाः अस्मि।
v. चत्वारः बालिकाः क्रीडन्ति।
vi. सः चौरेण बिभेति।
vii. कविभ्यः कालिदासः श्रेष्ठः।
viii. सः पुष्पं दृष्टम्।
ix. दीर्घः नदी वहति।
x. मनोहरं बालः खेलति।
xi. मार्गस्य उभयतः वृक्षाः सन्ति।
xii. मां मोदकं रोचते।
xiii. विद्यायाः सदृशं धनं नास्ति।
xiv. पिता पुत्रीं क्रुध्यति।
xv. पिता पुत्रीं स्निह्यति।
xvi. सा स्वकार्ये निपुणः अस्ति।
xvii. रामः पाठः पठितः।
xviii. त्वं गीतं गीतम्।
xix. मनुष्यः सामाजिकं प्राणी अस्ति।
xx. दैनिकी कार्यं मया सम्पन्नम्।

प्रश्न 3 – अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु काश्चन अशुद्धयः सन्ति। तेषां शुद्धरूपं विकल्पेभ्यः चित्वा लिखतु।

i. <u>सा</u> बालकः भोजनं खादति।

(क) सः (ख) ते

(ग) तौ (घ) तम्

ii. वयं ह्यः विज्ञानं <u>पठिष्यावः</u>।

(क) अपठाम (ख) पठिष्यामः

(ग) पठाम (घ) पठिष्यामि

iii. <u>हिमालयेन</u> गङ्गा प्रभवति।

(क) हिमालस्य (ख) हिमालये

(ग) हिमालयम (घ) हिमालयात्

iv. मोहनस्य चत्वारः <u>पुत्राणि</u> सन्ति।

(क) पुत्रः (ख) पुत्राः

(ग) पुत्रान् (घ) पुत्राभिः

v. तौ किमर्थं <u>गच्छन्ति</u> ?

(क) गच्छतः (ख) गच्छति

(ग) गच्छथः (घ) गच्छत

vi. <u>भवान्</u> किं नाम अस्ति ?

(क) भवन्तम् (ख) भवता

(ग) भवतः (घ) भवते

vii. तौ सुखेन <u>न्यवसतः</u>।

(क) न्यवसतम् (ख) न्यवसताम्

(ग) न्यवसत् (घ) न्यवसन्

viii. यदा वर्षाकाले अरपानद्यां जलप्लावनं <u>जाता</u>।

(क) जातम् (ख) जातः

(ग) जातानि (घ) जाते

ix. आर्यस्य प्रसादान् अखण्डिता मे वणिज्या।

(क) प्रसादस्य (ख) प्रसादे

(ग) प्रसादेन (घ) प्रसादाय

x. आचार्यः छात्राः उपदिशन्ति।

(क) छात्रः (ख) छात्रेण

(ग) छात्रान् (घ) छात्रैः

xi. कन्याः हसति।

(क) हसन्ति (ख) हसतः

(ग) हसामः (घ) हसथ

xii. त्वया पुष्पाणि चिनोयति।

(क) चिन्वन्ति (ख) चिनुत

(ग) चीयते (घ) चीयन्ते

xiii. सः याचकः पादस्य पंगुः अस्ति।

(क) पादम् (ख) पादाय

(ग) पादेन (घ) पादैः

xiv. तस्य कलत्रं सुन्दरी अस्ति।

(क) सुन्दरम् (ख) सुन्दर

(ग) सुन्दरा (घ) सौन्दर्या

xv. तत् धेनुः कस्य अस्ति ?

(क) सः (ख) सा

(ग) ते (घ) ताः

xvi. एकदा एकः वृद्धा अपतत्।

(क) एका (ख) एकम्

(ग) एकेन (घ) एकाः

xvii. रामेण निबन्धः <u>लिखति</u>।

(क) लिखन्ति (ख) लिखतः

(ग) लिख्यते (घ) लिख्यन्ते

xviii. यत्र नार्यस्तु पूज्यन्ते <u>रमति</u> तत्र देवताः।

(क) रमन्ति (ख) रमन्ते

(ग) रमते (घ) रमेते

xix. कृष्णः पुस्तकं <u>ददति</u>।

(क) ददाति (ख) दत्तः

(ग) ददासि (घ) ददामि

xx. रामः <u>रावणः</u> उक्तवान्।

(क) रावणम् (ख) रावणेन

(ग) रावणाय (घ) रावणात्

प्रश्न 4 – अधोलिखितेषु वाक्येषु अशुद्धपदानाम् अन्वेषणं कृत्वा तेषां कारणं हिन्दीभाषया लिखतु।

i. परिश्रमस्य विना विद्या न लभते। ................................................................................

ii. सरस्वतीं नमः। ................................................................................

iii. मार्गस्य उभयतः वृक्षाः सन्ति। ................................................................................

iv. सा जलं पिबिष्यति। ................................................................................

v. वयं विद्यालये गच्छामः। ................................................................................

vi. भ्रमराः पुष्पाणि अभिलषन्ति। ................................................................................

vii. मां संस्कृतव्याकरणम् अतीव रोचते। ................................................................................

viii. बालकः कन्दुकेन क्रीड्यते। ................................................................................

ix. मोहनस्य अष्टकन्याः अस्ति। ................................................................................

x. आवां संस्कृतभाषां पठामः। ................................................................................

# 11. उपसर्ग–आधारिताः प्रश्नाः

प्रश्न 1 – उचितं विकल्पं चित्वा लिखतु।

i. एषु पदेषु सोपसर्गोऽस्ति।

(क) उत्तिष्ठति (ख) उच्यते

(ग) सर्वोदयः (घ) कस्मिंश्चित्

ii. एषु पदेषु सोपसर्गो नास्ति।

(क) समाविशतु (ख) सन्मित्रम्

(ग) अनुव्रजन्ति (घ) समाचरेत्

iii. 'अभ्यागतः' इति पदे उपसर्गोऽस्ति।

(क) अ (ख) अभी

(ग) अभि (घ) आगतः

iv. एषु पदेषु सोपसर्गः नास्ति।

(क) अनुभवति (ख) आरोहति

(ग) प्रतिवदति (घ) चतुर्युगम

v. 'सूक्तिः' पदे उपसर्गः अस्ति।

(क) स (ख) सु

(ग) सू (घ) सूक्

vi. एषु पदेषु सोपसर्गः नास्ति।

(क) आदेशम् (ख) प्राचलताम्

(ग) निवेदितवान् (घ) एकस्मिन्

vii. 'न्ययोजयत्' पदे उपसर्गः अस्ति।

(क) न (ख) न्य

(ग) नि (घ) नी

viii. उपसर्गः नास्ति।

(क) अ (ख) अभि

(ग) अति (घ) अधि

ix. 'अभि' उपसर्गयुक्तपदं नास्ति।

(क) अभ्यासः (ख) अभ्यागतः

(ग) अभिधीयते (घ) अभी

x. 'सम्' उपसर्गयुक्तपदं नास्ति।

(क) संसक्ता (ख) सम्मानः

(ग) संमोहः (घ) सन्मित्रम्

प्रश्न 2 – उचितैः पदैः रिक्तस्थानानि पूरयतु।

i. 'व्याकरणम्' इति पदे .................... उपसर्गः अस्ति।

ii. 'प्रविचलन्ति' इति पदे .................... उपसर्गः अस्ति।

iii. 'प्रत्यागतः' इति पदे .................... उपसर्गः अस्ति।

iv. 'परिकीर्तिता' इति पदे .................... उपसर्गः अस्ति।

v. 'पलायनम्' इति पदे .................... उपसर्गः अस्ति।

प्रश्न 3 – अधोलिखितान् उपसर्गान् योजयित्वा चत्वारि–चत्वारि नवीनपदान् रचयतु।

(क) निस् (ख) निर् (ग) दुर् (घ) दुस्

(ङ) उत् (च) सम (छ) वि (ज) अभि

(झ) सु (ञ) परि (त) अनु (थ) आ

# 12. पत्र–लेखनम्

प्रश्न 1 – भवतः/भवत्याः नाम मालती अस्ति। भवत/भवत्याः विद्यालयस्य नाम शासकीय–उच्चतर–माध्यमिक–विद्यालय कमरौदः अस्ति। अस्वास्थ्यकारणात् त्रिदिनात्मकं अवकाशस्य हेतु स्वप्राचार्यं प्रति एकम् आवेदनपत्रं लिखतु।

प्रश्न 2 – भवतः नाम दीपेशः अस्ति। भवान् अधोलिखितां मञ्जूषां दृष्ट्वा शुल्कक्षमापनार्थं लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयतु उत्तरपुस्तिकायां च पुनः लिखतु।

मञ्जूषा

आशासे, पञ्चम्यां, पञ्चसहस्ररूप्यकाणि, निवेदनम्, अनुग्रहीष्यति, निर्वाहः, शुल्कमुक्तये, छात्राः

सेवायाम्,

प्राचार्यः

शासकीय–उच्च–माध्यमिक–विद्यालयः

जगदलपुरम् (छत्तीसगढम्)

विषय :– ...................... प्रार्थनापत्रम्।

महोदय!

सविनयं ...................... अस्ति यदहं भवतः विद्यालये दशमकक्षायाः छात्रः अस्मि। मम पिता एकः कृषकः अस्ति। तस्य मासिकः आयः ............... अस्ति। मम एकः भ्रातः अष्टमकक्षायां भगिनी च ..................... कक्षायां पठति। अस्माकं कुटुम्बस्य ................. अतीव कठिन्येन भवति।

अतः शुल्कक्षमापनार्थं प्रार्थयेऽहम्। ......................... अत्र भवान् मम एतां प्रार्थनां स्वीकृत्य अनुग्रहीष्यति ।

दिनांकः ................

भवतः विनीतः शिष्यः

दीपेशः

कक्षा – दशमी

प्रश्न 3 – भवान् पङ्कजः तिवारी अस्ति। भवान् शासकीय–उच्चतर–माध्यमिक–विद्यालय बिरेतरायां कक्षा–दशम्यां पठति। स्वप्राचार्यं प्रति स्थानान्तरण–प्रमाणपत्रस्य हेतु एकम् आवेदनपत्रं लिखतु।

प्रश्न 4 – भवतः नाम हितेशः। भवान् छात्रावासे वसति। परीक्षोपरान्ते भवान् बस्तरक्षेत्रे भ्रमणार्थं गन्तुम् इच्छति। अतः धनप्रेषणार्थं पितरं प्रति लिखितं पत्रं मञ्जुषातः उचितशब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखतु।

मञ्जूषा

शोभनानि, अग्रजाय, शीतकालावकाशे, आवश्यकानि, तत्रास्तु, भ्रमणाय, महाभागाः, अर्द्धवार्षिकी

स्थानम् रायपुरतः

दिनांक 06-10-23

परमादरणीयाः ..............................

सादरं प्रणमामि

अत्र कुशलं ..................... । बहुदिनात् मया पत्रं न लिखितम्। मम ............ परीक्षा समाप्ता गता। मम उत्तरपत्राणि .................... अभवन्। अस्मिन्.................... अहं गृहं न आगत्य मित्रैः सह बस्तरक्षेत्रस्य दर्शनीयानि स्थलानिं .................... गन्तुमिच्छामि। एतस्याः यात्रायाः कृते एकसहस्राणि रूप्यकाणि ....................। कृपया उक्तं धनराशिं प्रेषयतु भवान्।

शेषं सर्वं शोभनम्। मम मातरे ...................... च सादरं प्रणामाः।

भवदीयः प्रियपुत्रः

हितेशः

प्रश्न 5 – स्वविद्यालयस्य वर्णनं कुर्वन् मित्रं प्रति लिखितं पत्रं पठित्वा दत्तप्रश्नानाम् उत्तराणि लिखतु।

स्थानम् – जगदलपुरतः

दिनाङ्कः 10–08–2022

प्रियसखि सुमते!

नमस्ते!

अत्र कुशलं तत्रास्तु। भवत्याः पत्रं पठितम्। अहमपि स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि। मम विद्यालयः अतीव शोभः अस्ति। मम विद्यालये एकं विशालं क्रीडाक्षेत्रे समृद्धा प्रयोगशाला सम्पनः पुस्तकालयः च सन्ति। विद्यालये मनोहरा पुष्पवाटिकापि अस्ति। अस्माकं प्राचार्यः अध्यापकाः च अतीव कर्मठाः व्यवहारशीलाः च सन्ति।

अस्माकं अध्यापकाः मनोयोगेन पाठयन्ति। सर्वे छात्राः मित्रवन्तः सन्ति। विस्तरेण अनन्तरं लेखिष्यामि।

तव अभिन्नं मित्रम्

सौम्या भारद्वाजः

प्रश्नाः –

i. इदं पत्रं कुतः लिखितम् ?
ii. पत्रलेखकस्य नाम किम् पत्रं कया लिखितम् ?
iii. पत्रे कस्य विषयस्य वर्णनं कृतम् ?
iv. पत्रं कं प्रति लिखितम् ?
v. सौम्या भारद्वाजस्य मित्रस्य नाम किमस्ति ?
vi. पत्रं कदा लिखितम् ?
vii. सौम्या भारद्वाजस्य प्राचार्यः अध्यापकाश्च कीदृशाः सन्ति ?

# 13. गद्यांश–आधारिता: प्रश्ना:

प्रश्न 1 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारम् उत्तरत।

पूजा – भो प्रिये! त्वं किं पश्यसि ?

प्रिया – एतान् वृक्षान् पश्यामि।

पूजा – एतान् वृक्षान् के आरोपितवन्तः ?

प्रिया – अस्माकं पूर्वजाः आरोपितवन्तः।

पूजा – अस्माकम् अपि कर्त्तव्यं वर्तते, वयं अपि पादपान् रोपयाम।

प्रिया – त्वं सत्यं कथयसि।

पूजा – किं त्वं फलानि खादितुम् इच्छसि ?

प्रिया – आम्।

पूजा – तर्हि त्वम् अपि एकं पादपम् आरोपय।

निर्देशानुसारं प्रश्नाः उत्तरत –

i. 'एतान् वृक्षान्' अनयोः पदयोः विशेष्यपदं किमस्ति ?

ii. गद्यांशतः अव्ययपदानि चित्वा लिखत ।

iii. वयम् अपि पादपान् रोपयाम। अस्मिन् वाक्ये 'रोपयाम' इति क्रियापदस्य कर्तृपदं किमस्ति ?

पूर्णवाक्येन उत्तरत –

iv. वृक्षान् के आरोपितवन्तः ?

एकपदेन उत्तरत –

v. का वृक्षान् पश्यति ?

प्रश्न 2 – अधोलिखितस्य गद्यांशस्य हिन्दीभाषयानुवादं करोतु।

| | | |
|---|---|---|
| सरोवरः | – | नमो नमः, भवतः किं नाम अस्ति ? |
| विभवः | – | मम नाम विभवः अस्ति। |
| सरोवरः: | – | किं तव प्रियविषयः ? |
| विभवः | – | संस्कृतम् इति मम प्रियविषयः। |
| सरोवरः | – | भवान् कुत्र गच्छति ? |
| विभवः | – | अहं जगदलपुरं गच्छामि। |
| सरोवरः | – | कथम् ? |
| विभवः | – | बस्तरस्य सौन्दर्यं द्रष्टुं गच्छामि। |
| सरोवरः | – | बस्तरे बहूनि दर्शनीयानि स्थलानि सन्ति। किं दर्शनीयस्थलं द्रष्टुम् इच्छसि? |
| विभवः | – | अहं तीरथगढप्रपातं द्रष्टुम् इच्छामि। |

प्रश्न 3 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारम् उत्तरतु।

शृगालः अजां गृहीत्वा विवाहगृहे बद्ध्वा अटनाय प्रस्थितः। यदा सः पुनः विवाहगृहं आगच्छत् तदा अजामप्राप्य उपस्थितान् जनान् अपृच्छत् – अहं अत्र एकाम् अजां बद्ध्वा गतवान् ताम् अजां कः नीतवान् ? यूयं मह्यं मम अजां वधूं वा यच्छ। शृगालाय ते वधूं दत्तवन्तः। शृगालः स्वकार्ये सफलः अभवत्। सः वधूं नीत्वा स्वगृहमगच्छत्। सः वधूं धान्यकूटनाय निर्देशितवान्। वधू धान्यकूटने संसक्ता। अनन्तरं शृगालः एकं कुक्कुटमादाय आगच्छत्। तत्क्षणैव वधू तस्य शिरसि मूसलप्रहारं कृतवती। तेन प्रहारेण शृगालो मृतः जातः।

प्रश्ना : –

एकपदेन उत्तरत –

i. कः अटनाय प्रस्थितः ?

पूर्णवाक्येन उत्तरत –

ii. शृगालः कान् अपृच्छत् ?

iii. 'एकाम् अजां' अनयोः पदयोः विशेष्यपदम् अस्ति ?

iv. 'आदाय' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

v. 'यूयं मह्यं मम अजां वधूं वा यच्छ' अस्मिन् वाक्ये क्रियापदं किमस्ति ?

vi. 'जम्बुकः' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

प्रश्न 4 – अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरतु।

बिलासा शैशवकाले बाला–बालैः सह क्रीडति स्म। तस्यै बालकानां क्रीडनकं क्रीडनं च रोचते स्म। बिलासा अदम्य–साहसिका आसीत्। एकदा सुप्तं बालं नीत्वा वृक्कः पलायनं कुर्वन् आसीत्। तदा बिलासा वृक्कं दण्डेन ताडयित्वा बालकं मुक्तं कृत्वा मातरं समर्पयत्। बालकैः सह बिलासा मल्लकौशलं शिक्षते स्म। तं साहसं दृष्ट्वा जनैः तस्याः दलाय ग्रामरक्षणस्य दायित्वं प्रदत्तम्।

प्रश्ना : –

एकपदेन उत्तरतु –

i. का अदम्य–साहसिका आसीत् ?

पूर्णवाक्येन उत्तरतु –

ii. जनैः कस्यै ग्रामरक्षणस्य दायित्वं प्रदत्तम् ?

निर्देशाानुसारं उत्तरतु –

iii. तस्यै इति सर्वनामपदं कस्यै प्रयुक्तम् ?

iv. 'अम्बाम्' इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु ?

v. 'सुप्तं बालं' अनयोः पदयोः विशेष्यपदं किमस्ति ?

प्रश्न 5 – अधोलिखित–गद्यांशस्य हिन्दीभाषया अनुवादं करोतु।

बिलासा स्वकार्येण न केवलं स्वसमाजे अपितु समस्त–छत्तीसगढप्रान्ते सम्मानीतस्ति। सम्प्रति छत्तीसगढसर्वकारेण मत्स्यपालनक्षेत्रं प्रोत्साहनार्थं तया नाम्ना 'बिलासाबाई केंवटिन' इति पुरस्कारः प्रतिवर्षः दीयते। अपि च तया नाम्ना बिलासपुरे बिलासातालः, बिलासा–कन्या–स्नाकोत्तर–महाविद्यालयः बिलासाचतुर्पथम् प्रभृतयः गौरवान्विताः सन्ति। एवमेव छत्तीसगढस्य पूज्या बिलासा साहस–शौर्य कर्मनिष्ठाक्षेत्रेषु आदर्शभूतास्ति।

प्रश्न 6 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारम् उत्तरत।

चाणक्यः – अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणः अमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

चन्दनदासः – आर्य! अलीकमेतत्। केनाप्यनार्येण आर्याय निवेदितम्।

चाणक्यः – भो श्रेष्ठिन्! अलमाशंकया। भीताः पूर्वराजपुरूषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

प्रश्ना : –

i. 'अयमीदृशो विरोधः' अस्मिन् वाक्ये विशेष्यपदम् अस्ति ?

ii. 'निर्भयाः' इति पदस्य विपर्ययपदं गद्यांशे किमस्ति ?

iii. 'रक्षसि' इति क्रियापदस्य कर्तृपदं किमस्ति ?

iv. 'भीताः राजपुरूषाः' अनयोः पदयोः विशेषणपदं किमस्ति ?

v. पृथकपदं चिनुत –

यान्ति, गच्छन्ति, गदन्ति, व्रजन्ति

गद्यांशे 'गच्छन्ति' इत्यस्य पर्यायपदं किं प्रयुक्तम् ?

प्रश्न 7 – अधोलिखितं गद्यांशं पठित्वा निर्देशानुसारम उत्तरतु।

अत्रैव तस्य बालमनसि सेवाभावना–बीजं स्फुटितम्। पित्रा सह बरबन्दाग्रामे अस्य शैशवं छात्रजीवनं च व्यतीतम्। तेन सर्वासु परीक्षासु प्रथम श्रेण्यामुत्तीर्य प्रतिभा प्रतिस्थापिता। 1951 तमे वर्षे नागपुर–विश्वविद्यालयेन एम.एस.सी. (विशुद्धगणित) उपाधि स्वर्णपदकं च प्रदत्ते। सर्वोच्चङ्कं प्राप्य कैम्ब्रिज विश्वविद्यालयस्य 'रेंग्लर फेलोशिप' प्राप्तवानसौ।

प्रश्ना : –

एकपदेन उत्तरत –

i. आत्मानन्दस्य शैशवं छात्रजीवनम् च कुत्र व्यतीतम् ?

पूर्णवाक्येन उत्तरत –

ii. आत्मानन्देन कस्मिन् वर्षे एम.एस.सी. परीक्षा उत्तीर्णा ?

iii. ''सर्वासु परीक्षासु'' अनयोः पदयोः विशेषणपदं किमस्ति?

iv. जनकेन इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखतु।

v. त्रीणि अव्ययपदानि गद्यांशतः चित्वा लिखतु।

प्रश्न 8 – अधोलिखितगद्यांशस्य हिन्दीभाषया अनुवादं करोतु।

स्वामी आत्मानन्दः अतीव प्रतिभाशाली वक्ता–लेखकश्चापि आसीत्। अध्यात्म–सम्बन्धीनाम् अन्य विषयानां च प्रवचनैः सः देशे ख्यातिं लब्धवान्। तस्य द्विखण्डात्मकं 'गीता तत्वचिन्तनम्', इति ग्रंथः अतीव सुमनोहरः अस्ति। धर्मदर्शनक्षेत्रे अस्य महाभागस्य कृतयः पाठकेषु वैज्ञानिकदृष्ट्यभिवृद्धिं कुर्वन्ति।

प्रश्न 9 – अधोलिखितं गद्याशं पठित्वा निर्देशानुसारम् उत्तरतु।

कमला – मातः! प्रतिदिनमेव मह्यं कक्षाध्यापिका विषयाध्यापकाश्च विद्यालयगणवेशं धारियतुं कथयन्ति। अहं तु एकं मलिनं वस्त्रं परिधाय विद्यालयं यामि। प्रतिदिनमेव मे कक्षायाः बहिः निष्कासनं क्रियते। कक्षागवाक्षात् एव पाठ्यमानं विषयं अहं श्रृणोमि।

प्रश्ना : –

i. 'मलिनं वस्त्रम्' अनयोः पदयोः विशेष्यपदं किमस्ति ?

ii. 'आगच्छामि' इति क्रियापदस्य विपर्ययपदं गद्यांशतः चित्वा लिखत।

iii. 'प्रतिदिनमेव मे कक्षायाः बहिः निष्कासनं क्रियते' अस्मिन् वाक्ये 'मे' इति पदे का विभक्तिरस्ति ?

iv. 'यामि' इति क्रियापदस्य कर्तृपदं गद्यांशतः चित्वा लिखतु।

v. 'गवाक्षात्' इति पदस्य हिन्दीभाषया अर्थं लिखतु।

प्रश्न 10 – अधोलिखितस्य गद्यांशस्य हिन्दीभाषया अनुवादं कुरुत ।

अनिलः – मित्रवर! न ते वचोऽभिनन्दामि। चिन्ता तु शिक्षादीक्षाकृते च करणीया। यदि अन्यथा न मन्यसे तर्हि वृहत् परिवारः एव युष्मदीयं दुःखकारणम्। वृत्या तु भवत्सदृशमेव अर्थोपार्जनं क्रियते मया।

प्रश्न 11 – अधोलिखितं गद्याशं पठित्वा निर्देशानुसारेण उत्तरत।

तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च, परं विचित्रामघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वा अभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरूषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

प्रश्ना : –

एकपदेन उत्तरत –

i. कः चौरः आसीत् ?

पूर्णवाक्येन उत्तरत –

ii. रक्षापुरूषः अतिथिं कुत्र प्राक्षिपत् ?

iii. 'एकां मञ्जूषाम्' अनयोः पदयोः विशेषणपदं किमस्ति ?

iv. प्रदाय इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखत।

v. 'तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वा अभर्त्सयन्''। अस्मिन् वाक्ये तस्य इति सर्वनामपदं कस्मै प्रयुक्तम् ?

प्रश्न 12 – अधोलिखितं गद्यांश पठित्वा निर्देशानुसारेण उत्तरत।

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। सः स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनुजस्य रूग्णतामाकर्ण्य व्याकुलो जातः। पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीड़ितः स बसयानं विहाय पदातिरेव प्राचलत्।

प्रश्ना : –

i. 'निर्धनः जनः' अनयोः पदयोः विशेष्यपदं किमस्ति ?

ii. सः स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जातः। अस्मिन् वाक्ये सः इति सर्वनामपदं कस्मै प्रयुक्तम् ?

iii. 'प्रसन्नः' इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखत।

एकपदेन उत्तरत –

iv. निर्धनः जनः कं प्रवेशं दातुं सफलः जातः ?

पूर्णवाक्येण उत्तरत –

v. पिता कस्य रूग्णतामाकर्ण्य व्याकुलो जातः ?

vi. " प्रस्थितः" इति कियापदस्य कर्तृपदं किम् ?

प्रश्न 13 – अधोलिखितं गद्यांश पठित्वा निर्देशानुसारेण उत्तरत।

PSLV C-25 प्रक्षेपकयानेन मङ्गलयानस्य गतिः प्रति निमेषम् 22:57 किलोमीटर परिमितम् इति आसीत्। वैज्ञानिकाः गतिनियन्त्रणं कृत्वा प्रति निमेषम 4.6 किलोमीटर परिमितं कृतवन्तः। अयं कार्यक्रमः कठिनतमः आसीत्। यतः अत्र अवधेयता इयम् आसीत् यत् यानस्य गति एतावन्मन्दं मा भवतु येन तत् यानं मङ्गलस्य अधिकरणे ध्वस्तं भवेत्। अपि च यानस्य वेगः अपि एतादृशः तीव्रः न स्यात् येन तत् मङ्गलकक्षात् बहिः अन्तरिक्षे विलुप्तताम् आप्नोतु। अस्य यानस्य मार्गः सप्तधा परिवर्तितः।

i. 'अयं कार्यक्रमः' कठिनतमः आसीत्।' अस्मिन् वाक्ये विशेष्यपदम् अस्ति ?
ii. अस्य यानस्य मार्गः सप्तधा परिवर्तितः। अस्मिन् वाक्ये अस्य इति सर्वनामपदं कस्मै प्रयुक्तम् ?
iii. अन्तः इति पदस्य विपर्ययपदं गद्यांशतः चित्वा लिखत।
iv. गगने इति पदस्य पर्यायपदं गद्यांशतः चित्वा लिखत।
v. मङ्लयानस्य मार्गः कतिधा परिवर्तितः।

प्रश्न 14 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

यदा वर्षाकाले अरपानद्यां जलप्लावनं जातम्। तदा बिलासा नौकया जनान् संतारयति स्म। एवमेव सा नौकाचालनेऽपि पारङ्गता जाता। सा लोकनृत्यगीतयोः अपि सिद्धा आसीत्। ग्रामस्य सर्वेषु कार्यक्रमेषु सा अग्रसरासीत्।

प्रश्नाः

1. कदा अरपानद्यां जलप्लावनं जातम् ?
2. बिलासा कया जनान् संतारयति स्म ?
3. बिलासा कस्मिन् कार्ये पारङ्गता जाता?
4. सा कयोः सिद्धा आसीत् ?
5. ' सर्वेषु कार्यक्रमेषु' अनयोः पदयोः विषेष्यपदं किम् ?
6. ' सा लोकनृत्यगीतयोः अपि सिद्धा आसीत्।' वाक्यस्य हिन्दीभाषया अनुवादं लिखत।
7. ' पारङ्गता जाता' इति क्रियापदस्य कर्तृपदं किम्

प्रश्न 15 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

कालान्तरे बिलासायाः विवाहः बंषी नाम्ना युवकेन सह अभवत्। बिलासा प्रतिदिनं 'चार–तेन्दू' इति वन्यफलानि संग्रहणार्थं गच्छति स्म। तथा च बंषी महिषचारणाय वनं प्रति अगच्छत्। यदा सायंकाले बिलासा पत्या साकं गृहं प्रति न्यवर्तयति स्म तदा सहसा आखेटाय भ्रमतः राज्ञः कल्याणसायस्योपरि एकः व्याघ्रः आक्रमणं कृतवान्। तं विलोक्य बिलासा व्याघ्रम् कुन्तेन प्रहार्य राज्ञः प्राणान् अरक्षयत्। अनया कल्याणसायः बिलासया प्रभावितो भूत्वा अपरं दिवसं अरपानद्याः द्वयोः तटयोः 'जागीर' बिलासायै दत्तवान्। तथा च राजा रतनपुरं प्रत्यागतः। अनन्तरं तां खड्गेन अलंकृत्य 'महिला–सेनापति' इति पदे न्ययोजयत्।

प्रश्नाः

1. बिलासायाः विवाहः केन सह अभवत् ?
2. बिलासा प्रतिदिनं किमर्थं वनं प्रति गच्छति स्म।
3. राज्ञः कल्याणसायस्योपरि कः: आक्रमणं कृतवान् ?

प्रश्न 16 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

'यत्र जीवः तत्र षिवः' इति मंत्रस्य साधकः त्यागमूर्तिश्च स्वामी आत्मानन्दः सदैव जनानां कल्याणार्थं समर्पितः आसीत् सः इदृषः सन्तः आसीत् यत् यस्य ध्येयवाक्यं सर्वत्र प्रषंसितम् आसीत्।
यथा –
''परगुण परमाणून् पर्वतीकृत्य नित्यम्।

निजहृदि विकसन्तः सन्ति सन्तः कियन्तः।।''

प्रश्नाः

1. आत्मानन्दः 'कस्य मन्त्रस्य साधकः सन्तः आसीत् ?
2. विकसन्तः' पदे प्रत्यय अस्ति –
3. 'सन्तः' इति कर्तृपदस्य क्रियापदं किम् ?

प्रश्न 17 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

तस्य पितुः नाम धनीरामः मातुः नाम भाग्यवती च आसीत्। तौ धर्मपरायणौ आस्ताम्। स्वामी आत्मानन्दस्य जन्म 06 अक्टूबर 1929 तमे वर्षे अभवत्। आत्मानन्दस्य बाल्यकालस्य नाम तुलेन्द्रः आसीत्। सः 26 अगस्त 1989 तमे वर्षे निर्वाणं प्राप्य ब्रह्मलीनष्चाभवत्।

तस्य लक्ष्यमासीत् –

'' न त्वहं कामये राज्यं न च स्वर्गं नपुनर्भवम्।
कामये दुःख– तप्तानां प्राणिनामार्तिनाषनम्।।''

प्रश्नाः

1. आत्मानन्स्य मातुः नाम किम् ?
2. आस्ताम्' इति क्रियापदस्य कर्तृपदं किम्?
3. आत्मानन्दस्य पितुः नाम किम् ?
4. आत्मानन्दस्य जम्म कदा अभवत् ?

प्रश्न 18 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

स्वामी विववेकानन्दः रायपुरे द्विवर्षपर्यन्तं समयं व्यतीतवान्। येन इदं नगरं परिपूतमभवत्। स्वामी विवेकानन्द– जन्मषताब्दी–वर्षे भव्यं स्मारकं निर्मातुं सः आत्मानंदः प्राणपणेनायतत्। अयम् आश्रमः आध्यात्मिकदर्षनस्य केन्द्रमस्ति। आश्रमैव 'पालीक्लिनिक' इति औषधालयः ग्रन्थालयः च स्थापितः। तत्रैव स्थापिते ठाकुररामकृष्णदेवालये स्वर्गोपमानि आनन्दानि प्रसृतानि।

प्रश्नाः

1. स्वामी विववेकानन्दः रायपुरे कति वर्षपर्यन्तं समयं व्यतीतवान ?
2. विवेकानन्दस्य प्रवासेन किं नगरं परिपूतमभवत् ?
3. स्वामी विवेकानन्द– जन्मषताब्दी–वर्षे भव्यं स्मारकं निर्मातुं कः: प्राणपणेनायतत् ?
4. ठाकुररामकृष्णदेवालयः कुत्र स्थापितः ?
5. 'इदं नगरम्' अनयोः पदयोः विषेषणपदं किम् ?
6. ''भव्यं स्मारकम्' अनयोः पदयोः विषेष्यपदं किम् ?

प्रश्न 19 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

स्वामीआत्मानन्दस्य संगठनकौषलम् अपूर्वम् आसीत्। तस्य निर्देषने संरक्षणे च मध्यप्रान्ते, महाराष्ट्र–उडीसा–राजस्थान–छत्तीसगढे बहवः रामकृष्णविवेकानन्द–आश्रमाः प्रतिष्ठिताः। अयं महापुरुषःशैषवकालादेव मेधावी प्रतिभासम्पन्नष्च आसीत्। सन् 1938 तमे वर्षे अस्य पिता महात्मा गान्धिना स्थापिते बुनियादी–प्रषिक्षणविद्यालये वर्धायां षिक्षक–रुपेण नियुक्तः। प्रति रविवारे पिता–पुत्रौ गांधिनः दर्षनार्थं सेवाश्रमम् अगच्छताम्। तत्र बालः तुलेन्द्रः गान्धिनः भ्रमण– सहायकष्चासीत्। अत्रैव तस्य बालमनसि सेवाभावना–बीजं स्फुटितम्। पित्रा सह बरबन्दाग्रामे अस्य शैषवं छात्रजीवनं च व्यतीतम्। तेन सर्वासु परीक्षासु प्रथम श्रेण्यामुत्तीर्य प्रतिभा– प्रतिस्थापिता। 1951 तमे वर्षे नागपुर–विष्वविद्यालयेन एम.एससी. (विषुद्धगणित) उपाधि स्वर्णपदकं च प्रदत्ते। सर्वोच्चाङ्कं प्राप्य कैम्ब्रिज विष्वविद्यालयस्य 'रेंग्लर फेलोषिप' प्राप्तवानसौ।

प्रश्नाः

1. कस्य संगठन–कौषलम् अपूर्वम् आसीत् ?
2. आत्मानन्दः:शैषवकालादेव कीदृषः आसीत् ?
3. आत्मनन्दस्य पिता कुत्र षिक्षक–रुपेण नियुक्तः ?
4. पिता–पुत्रौ गांधिनः दर्षनार्थं कुत्र गच्छतः स्म ?
5. कुत्र आत्मानन्दस बालमनसि सेवाभावना–बीजं स्फुटितम् ?
6. 'बालः तुलेन्द्रः' अनयोः पदयोः विषेषणपदं किम् ?
7. ' सर्वासु परीक्षासु' अनयोः पदयोः विषेष्यपदं किम् ?
8. 'जनकेन' इति पदाय पर्यायपदं गद्यांषतः चित्वा लिखत ।
9. आत्मनन्दस्य शैषवं छात्रजीवनं च व्यतीतम् ?

प्रश्न 20 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

कश्चन् निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। सः स्वपुत्रं एकस्मिन् महाविद्यालये प्रवेशं दातुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनुजस्य रुग्णतामाकर्ण्य व्याकुलो जातः। पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

प्रश्नाः

1 एक पदेन उत्तरत–

1. केन पीड़ितः जनः पदातिः एव प्राचलत् ?
2. निर्धनः जनः भूरि परिश्रम्य किम् आर्जितवान् ?

2 पूर्णवाक्येन उत्तरत –

1. पिता किमर्थं व्याकुलः जातः ?

3 प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत –

1. 'तनयः' इति कर्तृपदस्य क्रियापदं किम् ?

(क) निवसन् (ख) अध्यने

(ग) समभूत (घ) संलग्नः

2. 'पुत्रस्य' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

(क) तनुजस्य (ख) तनयः

(ग) स्वपुत्रं (घ) पुत्रं

3. 'प्रस्थितः' इति क्रियापदस्य कर्तृपदं किम् ?

(क) पुत्रः (ख) पिता

(ग) दृष्टु (घ) एकदा

4. 'गृहीत्वा' इति पदस्य विपरीतार्थकं पदं किम् ?

(क) विहाय (ख) पदातिः

(ग) संलग्न (घ) भूरि

प्रश्न 21 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशंकया तमन्वधावत् अगृह्णाच्च, परं विचित्रामघटत। चौरः एव उच्चैः क्रोशितुमारभत "चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वा अभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौर आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

प्रश्नाः

एक पदेन उत्तरत–

1. वस्तुतः चौरः कः आसीत् ?
2. निहितां मञ्जूषाम् आदाय कः पलायितः ?

पूर्णवाक्येन उत्तरत्–

1. प्रबुद्धाः ग्रामवासिनः किम् अकरोत् ?

प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत –

1. 'प्राक्षिपत्' इति कियापदस्य कर्तृपदं किम् ?
   (क) रक्षापुरुषः (ख) अतिथिं
   (ग) चौरः (घ) अयं
2. 'जागरितः' इति पदस्य पर्यायपदं किम् ?
   (क) सुप्तः (ख) प्रबुद्धः
   (ग) आरक्षी (घ) पलायितः
3. 'तस्य तारस्वरेण' अत्र 'तस्य' सर्वनामपदं कस्य कृते प्रयुक्तम् ?
   (क) चौरः (ख) चौरस्य
   (ग) चौराय (घ) अतिथये
4. 'अतिथि' इति पदस्य विषेषणपदं किम् ?
   (क) प्रबुद्धः (ख) पादध्वनिना
   (ग) चौरषङ्कया (घ) चौरः

प्रश्न 22 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत्। स भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच–'रे दुष्ट! तस्मिन् दिने त्वया अहं चोरितायाः मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे'' इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

प्रश्नाः

1 एक पदेन उत्तरत–

1. कृशकायः कः आसीत् ?
2. भारवतः शवस्य स्कन्धेन वहनं कस्य कृते दुष्करम् आसीत्।

2 पूर्णवाक्येन उत्तरत्–

1. जनस्य क्रन्दनं निषम्य आरक्षी किम् उक्तवान् ?
2. आरक्षी कीदृषः आसीत् ?
3. कः भारवेदनया क्रन्दति स्म ?
4. 'क्रन्दति स्म'इति क्रियापदय कर्तृपदं किम् ?
5. :कृषकाय' इति पदाय किं विलोमपदं प्रयुक्तम् ?
6. 'सुकरम्' इति पदस्य गद्यांषे किं विलोमपदं प्रयुक्तम् ?
7. 'चोरितायाः मञ्जूषायाः' पदयोः विषेषण–विषेष्यपदं किम् ?

3 प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत –

1. 'स्थापितवन्तौ' इति क्रियापदस्य कर्तृपदं किम् ?

(क) एकस्मिन (ख) चत्वरे

(ग) उभौ (घ) शवं

2. 'प्रसन्नः' इति पदस्य पर्याय' कः ?

(क) क्रन्दनं (ख) मुदितः

(ग) भारवतः (घ) कृषकायः

3. ' पटाच्छादितं' इति पदस्य विषेष्यपदं किम् ?

(क) निहितं (ख) काष्टफलके

(ग) काष्ठं (घ) देहं

4. 'तस्य क्रन्दनं.......। अत्र तस्य सर्वनामपदं कस्मै प्रयुक्तम् ?

(क) रक्षापुरुषाय (ख) न्यायधीषाय

(ग) अतिथये (घ) अतिथिः

प्रश्न 23 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान्– मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि 'त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अत निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे' इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

प्रश्नाः

एक पदेन उत्तरत–

1. कः प्रावारकं अपसार्य न्यायाधीषं अभिवादयति ?
2. न्यायाधीषेन पुनः तौ कस्याः विषये वक्तुम् आदिष्टवान् ?

पूर्णवाक्येन उत्तरत्–

1. न्यायाधीशः कथं न्यायाम् अकरोत् ?

प्रदत्तविकल्पेभ्यो उचितम् उत्तरं चित्वा लिखत –

1. 'लप्स्यसे' इति क्रियापदस्य कर्तृपदं किम् ?

   (क) त्वं (ख) अतिथिः

   (ग) आरक्षी (घ) न्यायधीषः

2. 'आरक्षिणा' इति पदस्य विषेषणपदं किम् ?

   (क) अध्वनि (ख) एतेन

   (ग) यदुक्तं (घ) मान्यवर

3. 'मार्गे' इत्यर्थं गद्यांषे किं पदं प्रयुक्तम् ?

   (क) आरक्षिणे (ख) अपसार्य

   (ग) एतेन (घ) अध्वनि

4. 'त्वं' सर्वनाम पदं कस्य कृते प्रयुक्तम् ?

   (क) न्यायाधीषस्य (ख) अतिथेः

   (ग) अतिथये (घ) आरक्षी

प्रश्न 24 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

5 नवम्बरः 2013 खीष्ट्राब्दस्य बुधवासरे सर्वत्र मङ्गलम् मङ्गलमिति ध्वनिः भारते व्याप्ता आसीत्। भारतीयानां दृष्टिः इसरोसंस्थायाः मङ्गलकार्यक्रमे आसीत्। श्रीहरिकोटायाः सतीशधवनान्तरिक्षकेन्द्रे उपस्थिताः जनाः उल्लसिताः आसन्। प्रायः सार्धसप्तवादने मङ्गलयानस्य प्रवाहकः भागः सक्रियः अभवत्। ततः निमेषानन्तरम् एव तस्य साफल्यम् असाफल्यम् वा निर्धारितम् आसीत्। परं बुधवासरः मङ्गलमयः अभवत्, यदा मॉम मिशन मार्स ऑर्बिटर मिशन इत्यस्य प्रथमं चरणं सफलं जातम्।

प्रश्नाः

1. भारते कदा मङ्गलम् मङ्गलमिति ध्वनिः व्यापता आसीत् ?(एकपदेन उत्तरत)
2. ' आसन्' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?
3. प्रवाहकः भागः इति कर्तृपदस्य क्रियापदं किम् ?
4. ' जनाः उल्लसिता' अनयोः पदयोः विषेषणपदं किम् ?
5. ' प्रवाहकः भागः' अनयोः पदयोः विषेषणपदं किम् ?
6. 'साफल्यम्' इति पदस्य किं विलोमपदं प्रयुक्तम् ?
7. 'मॉम' इति शब्दस्य पूर्णविस्तारं लिखत ।
8. मङ्गलयानस्य प्रवाहकः भागः कदा सक्रियः अभवत् ?
9. सतीशधवनान्तरिक्षकेन्द्रं कुत्र स्थापितः ?

प्रश्न 25 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

अयं कार्यक्रमः कठिनतमः आसीत्। यतः अत्र अवधेयता इयम् आसीत् यत् यानस्य गति एतावन्मन्दं मा भवतु येन तत् यानं मङ्गलस्य अधिकरणे ध्वस्तं भवेत्। अपि च यानस्य वेगः अपि एतादृशः तीव्रः न स्यात् येन तत् मङ्गलकक्षात् बहिः अन्तरिक्षे विलुप्तताम् आप्नोतु । अस्य यानस्य मार्गः सप्तधा परिवर्तितः।

प्रश्नाः

1. ' अयं कार्यक्रमः' अनयोः पदयोः विषेषणपदं किम् ?
2. यानस्य वेगः कतिधा परिवर्तितः ?
3. अत्र का अवधेयता आसीत् ?
4. 'भवेत् इति क्रियापदस्य कर्तृपदं किम् ?
5. 'सरलतमः' इति पदस्य किं विलोमपदं प्रयुक्तम् ?
6. 'दुष्करम्' इति पदस्य किं पर्यायपदं प्रयुक्तम् ?
7. 'तीव्रं' इति पदस्य किं विलोमपदं प्रयुक्तम् ?

प्रश्न 26 – अधोलिखितगद्यांशान् पठित्वा प्रश्नान् उत्तरत–

अपि च किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा? तस्याधारस्य, संरचनायाः, वातावरणस्य तत्रस्थाः ये खनिजपदार्थाः तस्याध्ययनम्। किं मगलग्रहे जलस्य अस्तित्वम् आसीत्? किमत्र रक्तग्रहे मीथेन अस्ति वा न वा, यतः तस्यास्तित्वमेव जैविकं क्रियाकलापं निर्दिशति । एते प्रश्नाः अपि शोधनीयाः।

प्रश्नाः

1. 'किं मङ्गले जीवनम् आसीत् आहोस्वित् भविष्यति वा?' अस्य वाक्यस्य हिन्दीभाषया अनुवादं कुरूत ।
2. रक्तग्रहे' इत्यर्थं गद्यांषे किं पदं प्रयुक्तम् ?
3. एते प्रश्नाः अपि शोधनीयाः।' वाक्यस्य हिन्दी अनुवादं कुरूत ।
4. 'एते प्रश्नाः अपि शोधनीयाः।' अस्मिन् वाक्ये क्रियापदं किम् ?
5. 'जैविकं क्रियाकलापं' अनयोः पदयोः विषेषणपदं किम् ?

प्रश्न 27 – अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तराणि लिखत ।

चाणक्यः – वत्स! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि।

शिष्यः – तथेति (निष्क्रम्य चन्दनदासेन सह प्रविश्य) इतः इतः श्रेष्ठिन् (उभौ परिक्रामतः)

शिष्यः – (उपसृत्य) उपाध्याय! अयं श्रेष्ठी चन्दनदासः।

चन्दनदासः – जयत्वार्यः

चाणक्यः – श्रेष्ठिन्! स्वागतं ते। अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभाः?

चन्दनदासः – (आत्मगतम्) अत्यादरः शंकनीयः। (प्रकाशम्) अथ किम्। आर्यस्य प्रसादेन अखण्डिता मे वणिज्या।

चाणक्यः – भो श्रेष्ठिन्! प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियमिच्छन्ति राजानः।

चन्दनदासः – आज्ञापयतु आर्यः, किं कियत् च अस्मज्जनादिष्यते इति।

प्रश्नाः

1. केन सह शिष्य प्रविशति ?
2. चन्दनदासं कः द्रष्टुं इच्छसि ?
3. 'इच्छन्ति' इति कियापदस्य कर्तृपदं किम् ?
4. 'मे वणिज्या' अत्र 'मे' सर्वनामपदं कस्मै प्रयुक्तम् ?
5. 'प्रविष्य' इति पदस्य विलोमपदं किम् ?
6. आर्यस्य प्रसादेन अखण्डिता मे वणिज्या। अस्य वाकस्य हिन्दी अनुवादं कुरुत।

प्रश्न 28 – अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तराणि लिखत –

चाणक्यः – भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

चन्दनदासः – (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।

चाणक्यः – भो श्रेष्ठिन्! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः।

चन्दनदासः – आज्ञापयतु आर्यः।

चाणक्यः – राजनि अविरुद्धवृत्तिर्भव।

चन्दनदासः – आर्य! कः पुनरधन्यो राज्ञो विरुद्ध इति आर्येणावगम्यते?

चाणक्यः – भवानेव तावत् प्रथमम्।

प्रश्नाः

1. कस्य अथसम्बन्ध प्रीतिम् उत्पादयति ?
2. कस्मिन् अविरुद्धवृत्तिः भव ?
3. इदं राज्यं कस्य अस्ति ?
4. 'ज्ञायते' इति पदस्य कः अर्थः ?
5. ' भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्' अस्य वाकस्य हिन्दी अनुवादं कुरुत।

प्रश्न 29 – अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तराणि लिखत –

चन्दनदासः – (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम्।
कीदृशस्तृणानामग्निना सह विरोधः?

चाणक्यः – अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणः अमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

चन्दनदासः – आर्य! अलीकमेतत्। केनाप्यनार्येण आर्याय निवेदितम्।

चाणक्यः – भो श्रेष्ठिन्! अलमाशंकया। भीताः पूर्वराजपुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

प्रश्नाः

1. अग्निना सह केषां विरोधः?
2. प्रच्छादनं किं उत्पादयति ?
3. 'रक्षसि' इति क्रियापदस्य कर्तृपदं किम् ?
4. 'असत्यम्' इति पदस्य पर्यायपदं किम् ?
5. 'व्रजन्ति' इत्यस्य हिन्दीभाषया लिखत ।

# 14. पद्यांश–आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारेण उत्तरत।

माता गुरूतरा भूमेः खादप्युच्चतरः पिता।
मनः शीघ्रतरं वाताच्चिन्ता बहुतरी तृणात्।।

प्रश्नाः –

i. 'गुरूतरा' इति पदं कस्य विशेषणम् अस्ति ?
ii. वायोः इति पदस्य पर्यायपदं श्लोकात् चित्वा लिखत।
iii. पिता कस्मात् उच्चतरः ?
iv. का बहुतरी तृणात् ?
v. 'मनः' इति पदे लिङ्गं किम् ?
vi. पिता इति पदे का विभक्तिरस्ति ?
vii. मनः कस्मात् शीघ्रतरम् ?
viii. माता कस्याः गुरूतरा ?

प्रश्न 2 – अधोलिखितं पद्यांश पठित्वा निर्देशानुसारेण उत्तरत।

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्, भास्वानुदेष्यति हसिष्यति पंकजश्रीः।
इत्थं विचिन्तयति कोशगते द्विरेफे, हा हन्त! हन्त! नलिनीं गजउज्जहार।।

प्रश्नाः –

i. सुसंध्या इति पदस्य विपर्ययपदं श्लोकात् चित्वा लिखत।
ii. सूर्यः इति पदस्य पर्यायपदं श्लोकात् चित्वा लिखत।
iii. पृथकपदं चिनुत। (क्रियापददृष्ट्या)
गमिष्यति, भविष्यति, विचिन्तयति, उदेष्यति।
iv. 'रात्रिर्गमिष्यति' अस्मिन् पदे कः सन्धिरस्ति ?
v. श्लोकात् प्राप्ता कामपि एकां शिक्षां लिखत।

प्रश्न 3 – अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारेण उत्तरत।

शस्त्रैर्हता न हि हता रिपवो भवन्ति, प्रज्ञाहतास्तुरिपवः सुहता भवन्ति।
शस्त्रं निहन्ति पुरूषस्य शरीरमेकं प्रज्ञा कुलञ्च विभवञ्च यशश्च हन्ति ।।

प्रश्नाः –

i. कीदृशाः रिपवः हता न भवन्ति ?

ii. शस्त्रं किं निहन्ति ?

iii. 'बुद्धिः' इति पदाय पर्यायपदं लिखत।

iv. 'प्रज्ञाहतास्तुरिपवः सुहता भवन्ति' अस्मिन् वाक्ये अव्ययपदं चित्वा लिखत।

v. प्रज्ञा पुरूषस्य कानि–कानि हन्ति ?

vi. भिन्नपदं चिनुत – (वचनदृष्ट्या)
भवन्ति, निहन्ति, गच्छन्ति, वदन्ति

vii. 'रिपवो भवन्ति' पदे सन्धिः अस्ति।

viii. 'शस्त्रैर्हताः' पदे समासः अस्ति।

ix. 'मित्राणि' पदाय विलोमपदं प्रयुक्तम्।

x. 'शस्त्रं निहन्ति पुरूषस्य शरीरमेकम्' वाक्यस्य कर्तृपदं किम् ,

प्रश्न 4 – अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारेण उत्तरत।

अयं स कालः सप्राप्तः प्रियो यस्ते प्रियंवद।
अलंकृत इवाभाति येन संवत्सरः शुभः ।।

प्रश्नाः –

i. कः कालः सप्राप्तः ?

ii. 'अयं कालः' अनयोः पदयोः विशेषणपदं किमस्ति ,

iii. प्रियंवद इति पदे कः समासः अस्ति ?

iv. 'यस्ते' इति पदस्य सन्धिविच्छेदं कृत्वा सन्धेः नाम लिखत ?

v. संप्राप्तः इति पदे कः प्रत्ययः अस्ति ?

प्रश्न 5 – अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारेण उत्तरत।

आचार्यात्पादमादत्ते पादं षिष्यः स्वमेधया।

कालेन पादमादत्ते पादं सब्रह्मचारिभिः ।।

प्रश्नाः

1. शिष्यः कस्मात् पादम् आदत्ते ?
2. कः ब्रह्मचारिभिः पादम् आदत्ते ?
3. 'बुद्धया' इति पदाय श्लोके किं पदं प्रयुक्तम् ?
4. 'दत्ते' इति पदस्य किं विलोमपदं प्रयुक्तम् ?
5. शिष्यः तृतीयचतुर्थांशः केन लभते ?

प्रश्न 6 – अधोलिखितं पद्यांशं पठित्वा निर्देशानुसारेण उत्तरत।

श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्।

धृत्या द्वितीयवान्भवति राजन् बुद्धिमान्वृद्धसेवया।।

प्रश्नाः

1. ' तपसा विन्दते महत' अस्मिन् वाक्ये क्रियापदं किम् ?
2. 'अद्वितीयः इति पदाय किं विलोमपदं प्रयुक्तम् ?
3. केन श्रोत्रियो भवति ?
4. 'बुद्धिमान्वृद्धसेवया' अस्य पदस्य हिन्दी अनुवादं लिखत ।

प्रश्न 7 अधोलिखितपद्यांशस्य हिन्दीभाषया अनुवादं कुरुत –

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।

नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्।।

# 15. पाठ आधारिताः प्रश्नाः

प्रश्न 1 – अधोलिखित प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखतु।

1. विभवः कं प्रपातं द्रष्टुम् इच्छति ?
2. रणधीराय किं रोचते ?
3. राष्ट्रिय–ताप–विद्युतकेन्द्रं कुत्र अस्ति ?
4. भारत्यै किम् अतीव रोचते ?
5. विभवस्य प्रियविषयः किम्?
6. तीरथगढप्रपातं कुत्र अस्ति ?
7. एतान् वृक्षान् के आरोपितवन्तः ?
8. संजीवस्य पितुः नाम किम् ?
9. कयोः मध्ये मित्रता आसीत् ?
10. शृगालः कस्योपरि जलम्क्षिपत् ?
11. शृगालः मत्स्यं कुत्र संस्थापितवान् ?
12. वृद्धा किं पक्ववती ?
13. का धान्यकूटने संसक्ता ?
14. विनयः किम् आख्याति ?
15. न्याय्यात् पथः के न प्रविचलन्ति ?
16. साधोः शक्तिः कस्मै भवति ?
17. कस्माद् बुद्धिनाशो भवति ?
18. वपुराख्याति किम् ?
19. खलस्य धनं कस्मै भवति ?
20. कीदृशं जलं पिबेत् ?
21. केषु सख्यं भवति ?
22. नलिनीं कः उज्जहार ?

23. परसू कुत्र मत्स्याखेटं करोति स्म ?

24. बिलासायाः विवाहः केन सह अभवत् ?

25. मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते ?

26. राजा बिलासां कस्मिन् पदे न्ययोजयत् ?

27. जनैः बिलासायाः दलाय कस्य दायित्वं प्रदत्तम् ?

28. परसू स्वपत्न्या सह कुत्र अतिष्ठताम् ?

29. का लावण्यवती आसीत् ?

30. वर्षाकाले अरपानद्यां किं जातम् ?

31. राज्ञः कल्याणसायस्योपरि कः आक्रमणं कृतवान् ?

32. बिलासा चतुष्पथम् कुत्र अस्ति ?

33. केन श्रोत्रियो भवति ?

34. खादप्युच्चतरः कः ?

35. लाभानामुत्तमं किम् ?

36. तपसः किं लक्षणम् ?

37. 'शतसाहस्री संहिता' इति कस्य अपरं नाम अस्ति ?

38. सुखानाम् उत्तमा का ?

39. केन आवृत्तो लोकः ?

40. चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति स्म ?

41. तृणानां केन सह विरोधः नास्ति ?

42. कः चन्दनदासं द्रष्टुमिच्छति ?

43. चन्दनदासः कर्णौपिधाय किमुक्तवान् ?

44. कः मणिकारः श्रेष्ठी आसीत् ?

45. चन्दनदासस्य सुहृद् कः आसीत् ?

46. प्रीताभ्यः प्रकृतिभ्यः प्रतिप्रियं के इच्छन्ति ?

47. संस्कृतं कीदृशम् अस्ति ?

48. संस्कृते महर्षिभिः किं प्रोक्तम् ?

49. के रोगाणाम् अपहारकाः ?

50. भोजनान्ते किं पिबेत् ?

51. वृक्षाः केषां शोधकाः ?

52. किम् अनन्तपारं किल् ?

53. प्रज्ञाहताः रिपवः कीदृशाः भवन्ति ?

54. शिष्यः आचार्यात् कति भागं शिक्षाम् आदत्ते ?

55. केन समं सुखम् नास्ति ?

56. शस्त्रं पुरूषं कथं निहन्ति ?

57. आत्मानन्दस्य पितुः नाम किम् ?

58. आत्मानन्दस्य बाल्यकालस्य नाम किम् ?

59. आत्मानन्देन लिखितग्रन्थस्य नाम किम् ?

60. स्वामी विवेकानन्दः रायपुरे कतिवर्षः व्यतीतवान् ?

61. आत्मानन्दस्य शैशवं छात्रजीवनं च कुत्र व्यतीतम् ?

62. आत्मानन्दस्य शैशवकालादेव कीदृशः आसीत् ?

63. आत्मानन्देन किं रामकृष्ण–विवेकानन्द–चरणेषु समर्पितम् ?

64. देवानां माता अदितिः किं करोति ?

65. कस्य पिधानं करोति द्यौः ?

66. तण्डुलस्य पाककार्यं काः कुर्वन्ति ?

67. सूर्यः चन्द्रश्च ओदनस्य कौ स्तः ?

68. ओदनेन कस्मै सर्वेलोकाः समाप्याः ?

69. के सप्तऋषयः सन्ति ?

70. मोहनः कया वेदनया पीड़ितः आसीत् ?

71. किं पर्व आसन्नं वर्तते ?

72. कीदृशः परिवारः एव वरम् ?

73. का सूचिकर्मणः प्रशिक्षणं प्राप्तुं वाञ्छति ?
74. दीपमालिकापर्वणि कस्य शब्दः श्रुयते ?
75. कक्षाध्यापिका कक्षापञ्जिकायाः कस्याः नाम कर्तिष्यति ?
76. आपत्स्वपि किं न त्याज्यम् ?
77. श्रुत्यनिलयोः कति कन्याः सन्ति ?
78. मोहनस्य का पुत्री बहुकालाद् रूग्णा वर्तते ?
79. निर्धनः जनः कथं वित्तम् उपार्जितवान् ?
80. जनः किमर्थं पदाति गच्छति ?
81. वस्तुतः चौरः कः आसीत् ?
82. जनः केन कारणेन क्रन्दति स्म ?
83. जनः स्वपुत्रं कुत्र प्रवेशं दातुं सफलो जातः ?
84. जनः किम् आकर्ण्य व्याकुलो जातः ?
85. आरक्षी कीदृशः आसीत् ?
86. गृहिनः गृहे कः गृहाभ्यन्तरं प्रविष्टः ?
87. ग्रामवासिनः कं चौरं इति मत्वा अभर्त्सयन् ?
88. न्यायधीशः कं ससम्मनं मुक्तवान् ?
89. चौरः काम् आदाय पलायनं कुर्वन् आसीत् ?
90. हेमन्तकाले किं सुखावहं भवति ?
91. हेमन्ते उत्तरादिक् का इव आभाति ?
92. हेमन्ते वनराजयः कीदृशाः लक्ष्यन्ते ?
93. हेमन्तकाले वायुः कीदृशः भवति ?
94. हेमन्तऋतौ चन्द्रमाः केन संक्रान्तः भवति ?
95. मङ्गलयानस्य सफलपरीक्षणेन भारतस्य प्रतिष्ठा कुत्र समेधिता ?
96. कः देशः स्वकीये प्रथमप्रयासे मङ्गलग्रह कक्षम् अलभत् ?
97. कतिधा मङ्गलयानस्य मार्गः परिवर्तितः ?

98. मङ्गलयानं कुतः विमुक्तवान् ?

99. सम्प्रति विश्वे मङ्गलग्रहं प्रति यानप्रेषणस्य कति प्रयासाः अभवन् ?

100. प्रायः 'तरलमोटर' इति प्रविधेः प्रयोगः कस्मै क्रियते ?

101. का ग्रामस्य सर्वेषु कार्येषु अग्रसरा वर्तते स्म ?

प्रश्न 2 – अधोलिखितानां प्रश्नानाम् उत्तराणि हिन्दीभाषया लिखतु।

1. अस्माकं किं कर्तव्यम् ?
2. कोरबानगरं किमर्थं प्रसिद्धम् ?
3. तडागे गत्वा शृगालः किम् अकरोत् ?
4. शृगालः स्थाणुं किमुवाच् ?
5. शृगालः वधूं किं निर्देशितवान् ?
6. शृगालः तडागं किम् अकथयत् ?
7. शृगालः अजां गृहीत्वा किम् अकरोत् ?
8. वधूः शृगालस्य बन्धनात् कथं मुक्ता अभवत् ?
9. के के यत्र वर्तन्ते तत्र देवता सहायकृत् ?
10. धीराः कीदृशाः भवन्ति ?
11. सन्मित्रस्य किं लक्षणं प्रवदन्ति सन्तः ?
12. कोशगते द्विरेफः किं व्यचिन्तयत् ?
13. कः योग्यतमो नरः अस्ति ?
14. वृक्कः कं नीत्वा पलायनं कुर्वन् आसीत् ?
15. बिलासायाः वर्धमानं प्रभावं दृष्ट्वा प्रतिवेशिनः राज्यानि किम् अकरोत् ?
16. राजा कल्याणसायः बिलासायाः प्रभावितो भूत्वा तस्यै किं दत्तवान् ?
17. बिलासा शैशवकाले कैः सह क्रीडति स्म ?
18. का परा क्षमा प्रोक्ता ?
19. मानवः केन स्वर्गं न गच्छति ?

20. कः दमः प्रकीर्तितः ?

21. भीताः पूर्वराजपुरूषाः किं कुर्वन्ति ?

22. चन्द्रगुप्तस्य नन्दस्य च अनयोः राज्ययोः को भेदरस्ति ?

23. वृक्षाः प्राणिनां कथम् उपकुर्वन्ति ?

24. प्रज्ञा मानवस्य कानि–कानि हन्ति ?

25. भूतिम् इच्छता किम् आद्यम् ?

26. शब्दशास्त्रतः सारं किमर्थ ग्राह्यम् ?

27. वृक्षाणां रोपणं रक्षणं च किमर्थं हितावहम् ?

28. रामकृष्ण मिशन–आश्रमेण कानि–कानि सञ्चालितानि सन्ति ?

29. तुलेन्द्रस्य बालमनसि सेवाभावना बीजं कथं स्फुटितम् ?

30. ओदनस्य अक्षिणी के स्तः ?

31. राध्यमानस्यौदनस्य कुम्भी का भवति ?

32. गोविन्दः केन कारणेन विद्यालयं गन्तुं न इच्छति ?

33. गोपालः किमर्थं रूप्यकाणि याचते ?

34. संसारे कानि–कानि चक्रवत् परिवर्तन्ते ?

35. मोहनस्य दुःखस्य कारणं किम् आसीत् ?

36. अनिलस्य परिवारः किमर्थं सुखी आसीत् ?

37. सीता किमर्थम् उपहारं क्रेतुमिच्छति ?

38. परिवारे अस्माभिः कस्याः चिन्ता करणीया ?

39. प्रसृते अन्धकारे जनः किम् अचिन्तयत् ?

40. जनस्य क्रन्दनं निशम्य आरक्षी किमुक्तवान् ?

41. मतिवैभवशालिनः दुष्कराणि कार्याणि कथं साधयन्ति ?

42. चौरः उच्चैः किं क्रोशितुम् आरभत ?

43. आरक्षिणि निजपक्षं प्रस्तुतवति किम् आश्चर्यमघटत् ,

44. हेमन्त–ऋतौ शालयः कामवस्थां प्रतिपद्यन्ते ?

45. कीदृशाः दिवसाः भवन्ति हेमन्ते ?

46. ज्योत्स्ना केन कारणेन पौर्णमास्यां न राजते ?

47. भारतस्य मङ्गलकार्यक्रमे कति धनानि व्ययीभूतानि ?

48. के के देशाः मङ्गलग्रहकक्षं प्राप्तवन्तः ?

49. मङ्गलमिशन इत्यस्य मार्गस्य परिवर्तने का अवधेयता ?

50. अस्माकं मङ्गलयानस्य कानि प्रमुखानि उद्देश्यानि ?

प्रश्न 3 – अधोलिखितेषु वाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं करोतु।

1. भूपेशः भ्रमणाय कोरबानगरं गमिष्यति।
2. विभवः बस्तरस्य सौन्दर्यं द्रष्टुं गच्छति।
3. लोष्ठं जलात् बिभेति।
4. वरस्य ज्ञातिभिः जनैः वध्वाः स्वागतं कृतम्।
5. शृगालः वटिकां अजाचारिकाबालिकायै दत्तवान्।
6. शृगालः सम्यक् स्नानमकरोत्।
7. जलपातेन लोष्ठं गलितं जातम्।
8. मूसलेन प्रहारेण शृगालः मृतः जातः।
9. स्मृतिभ्रंशाद् बुद्धिनाशो भवति।
10. सन्मित्रं पापात् निवारयति।
11. मृगाः मृगैः संगमनुव्रजन्ति।
12. साधवः न सर्वत्र भवति।
13. बिलासा राज्यरक्षां कुर्वती वीरगतिं प्राप्तवती।
14. बिलासा व्याघ्रं कुन्तेन प्रहार्य राज्ञः प्राणान् अरक्षयत्।
15. बिलासा बालकैः सह मल्लकौशलं शिक्षते स्म।
16. लोभात् त्यजति मित्राणि।
17. माता गुरुतरा भूमेः।

18. मनः शीघ्रतरं वातात्।

19. आर्यस्य प्रसादेन मे वाणिज्या अखण्डिता।

20. शिविना विना इदं दुष्करं कार्यं कोऽपि न कुर्यात्।

21. शस्त्रैर्हताः रिपवः सुहता न भवन्ति।

22. रागसमं दुःखं नास्ति।

23. विद्यानिधये सेव्यं संस्कृतं कामधेनुवत्।

24. बालः तुलेन्द्रः गान्धिनः भ्रमणसहायकः चासीत्।

25. आत्मानन्दस्य संगठन–कौशलम् अपूर्वम् आसीत्।

26. आश्रमे एव 'पालीक्लीनिक' इति औषधालयः ग्रन्थालयः च स्थापित।

27. आत्मानन्दस्य पितरौ धर्मपरायणौ आस्ताम्।

28. धौपृथिवी ओदनस्य श्रोत्रे स्तः।

29. बृहस्पतिः तस्य ओदनस्य शिरः अस्ति।

30. ज्वरेण वेपते मे शरीरम्।

31. श्रृत्यनिलौ पुत्रीभ्यां सह स्वगृहं प्रति गच्छतः।

32. संसारे सुखानि दुःखानि च चक्रवत् परिवर्तन्ते।

33. गतस्य शोचनं न कर्तव्यम्।

34. ज्वरपीड़ितः मोहनः पर्यङ्के शयानः अस्ति।

35. कमला कक्षागवाक्षात् एव पाठ्यमानं विषयं श्रृणोति।

36. कक्षाध्यापिका विद्यां विद्यालयशुल्कपूर्तये भर्त्सयति।

37. कश्चिन्जनस्य मृतशरीरं राजमार्गं निकषा वर्तते।

38. आरक्षी जनं चौर्याभियोगे न्यायालयं नीतवान्।

39. सीता आतपे श्यामा लक्ष्यते।

40. रामः हेमन्तऋतुः प्रियः आसीत्।

41. हेमन्ते पृथिवी सस्यशालिनी भवति।

42. भारतस्य मङ्लयानं 05 नवम्बर 2013 ख्रीष्टाब्दस्य बुधवासरे मुक्तवान्।

43. अस्माकं मङ्गलयानकार्यक्रमेण अन्तरिक्षव्यवसायस्य अवसरः आयास्यति।

44. 'मीथेन गैस' इत्यस्य अस्तित्वं जैविकक्रियाकलापं निर्दिशति।

45. नासा 1964 खीष्टाब्दे 'मेरीनर–9 मिशन' इति माध्यमेन मङ्गलग्रहकक्षं प्राप्तवान्।

प्रश्न 4 – अधः कानिचित् कथनानि प्रदत्तानि । कः कं कथयति इति ज्ञापयतु।

1. वयम् अपि पादपान् रोपयाम्।
2. व्याकरणं तु भाषयाः आधारभूतं भवति।
3. प्रातः काले भ्रमणं मह्यम् अपि रोचते।
4. अहं जलात् बिभेमि।
5. मत्स्यं देहि अन्यथा काष्ठं देहि।
6. आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।
7. बाढम! एष एव मे निश्चयः।
8. पूर्वम् 'अनृतम्' इदानीम् 'आसीत्' इति परस्परविरूद्ध वचने
9. अद्य मां भृशं शिरोवेदना बाधते।
10. किं एवमेव मम जीवनं यास्यति।
11. देहि मे त्रिंशद्रूप्यकाणि।
12. मम तु कन्ये पुत्रसते एव स्तः।
13. गतस्य शोचनं न करणीयम्।
14. शून्यमिव दृश्यते मे जगत्।
15. वृहत् परिवारः एव युष्मदीयं दुःखकारणम्।
16. 'चौरोऽयम् चौरोऽयम्''
17. निजकृत्यस्य फलं भुङ्क्ष्व।
18. आदिश्यतां किं करणीयम्।
19. भवन्तः मम गृहम् आगच्छन्तु।
20. ज्वरेण पीडितोऽस्मि।

# 16. सुभाषितानि

प्रश्न 1 – स्वपाठ्यपुस्तकात् सुभाषितानि इति पाठतः द्वौ श्लोकौ लिखतु यौ अस्मिन् प्रश्नपत्रे न आगतौ।

प्रश्न 2 – अधोलिखितं सुभाषितम् पूर्णं करोतु।

i. वायूनां शोधकाः ........................................ ।
.................................................... हितावहम्।।

ii. नास्ति विद्यासमं ........................................ ।
.......................................................... सुखम्।।

iii. आचार्यात्पादमादत्ते ........................................ ।
.......................................................सुब्रह्मचारिभिः।।

iv. केषाञ्चिदपि .................................................... ।
...........................................................क्षुरिका।।

प्रश्न 3 – अधोलिखितस्य श्लोकस्य अन्वयंकृत्वा लिखतु।

i. यच्छक्यं ग्रसितुं शस्तं ग्रस्तं परिणमेच्च यत्।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ।।

ii. श्रुतेन श्रोत्रियो भवति तपसा विन्दते महत्।
धृत्या द्वितीयवान्भवति बुद्धिमान्वृद्धसेवया।।

प्रश्न 4 – अधोलिखितस्य अन्वयस्य सम्बधितं श्लोकं लिखतु।

i. लोकः केनस्विद् आवृतः केनस्विद् न प्रकाशते केनस्विद् मित्राणि व्यजति केन स्वर्गं न गच्छति ?

ii. सदभिः समं वृक्षाः त्वक्–शाखा–पत्र–मूलैः–पुष्प–फल–रसः आदिभिः च प्रत्यङ्गैः सदा उपकुर्वन्ति।

# 17. सूक्तयः

प्रश्न 1 – दशमकक्षायाः पाठ्यपुस्तकादेव चित्वा सूक्तीः लिखतु।

पथा –

i. अत्यादरः शङ्कनीयः

( अत्यधिक आदर शंका के योग्य है )

ii. परिवारः लघु एव वरम्।

( परिवार छोटा ही श्रेष्ट है। )

iii. छिद्रेष्वनर्थाः बहुली भवन्ति।

( दोषों में बहुत अनर्थ होते हैं।

iv. आत्मबलं न त्याज्यम् आपत्स्वपि।

( विपत्तियों में भी आत्मबल नहीं त्यागना चाहिए )

v. गतस्य शोचनं न कर्तव्यम्।

( बीते हुए का शोक नहीं करना चाहिए )

vi. संसारे दुःखानि सुखानि च चक्रवत् परिवर्तन्ते।

( संसार में दुःख और सुख पहिए के समान बदलते रहते हैं। )

vii. विचित्रा दैवगतिः।

( भाग्य की गति विचित्र होती है। )

viii. समानशील व्यसनेषु सख्यम्।

( समान आचरण और व्यसन वालों में स्वभाविक मित्रता होती है। )

ix. साधवो न हि सर्वत्र।

( सज्जन सभी जगह नहीं होते हैं। )

x. माता गुरूतरा भूमेः।

( माता भूमि से भी अधिक सहनशील होती है। )

xi. क्षमा द्वन्द्वसहिष्णुत्वम्।

( सम और विषम परिस्थितियों (द्वन्द्वों में) समभाव बनाये रखना ही क्षमा है। )

xii. ह्रीरकार्यनिवर्तनम्।

( न करने योग्य कार्य से दूर रहना ही लज्जा है। )

xiii. सेव्यं संस्कृतं कामधेनुवत्।

( संस्कृत कामधेनु के समान ही सेवा करने के योग्य है। )

xiv. वृक्षाः सद्भिः समं सदा।

( वृक्ष सदा सज्जनों के समान (उपकारी) होते हैं। )

xv. अलसस्य कुतो विद्या ?

( आलसी व्यक्ति की विद्या कहां ? )

प्रश्न 2 – अधोलिखितानां सूक्तीनां हिन्दीभाषया अनुवादं करोतु।

( प्रश्न 1 में दिये गये सभी सूक्तियां )

प्रश्न 3 – अधोलिखितानां वाक्यानां सम्बधित–सूक्तीः संस्कृतेन लिखतु।

i. सांसारिक वस्तुओं में लगाव के समान दुःख नहीं है।

ii. मित्रहीन का सुख कहां है ?

iii. विनम्रता वंश अर्थात् कुल को व्यक्त करती है।

iv. सज्जन लोग सभी जगह नहीं होते हैं।

v. विपत्तियों में भी आत्मबल नहीं त्यागना चाहिए।

vi. दोषों अर्थात् कमियों में बहुत अनर्थ होते हैं।

vii. अत्यधिक आदर शंका के योग्य है।

viii. विद्या के समान दृष्टि नहीं है।

ix. अपने धर्म अर्थात् कर्तव्य पर स्थिर रहना अर्थात् डटे रहना ही तप है।

x. समान आचरण व व्यसन वालों में स्वाभाविक मित्रता होती है।

प्रश्न 4 – पाठे प्रदत्तानां सूक्तीनां सम्बन्धितान् प्रसङ्गान् हिन्दीभाषया लिखतु।

i. छिद्रष्वनर्थाः बहुली भवन्ति।
ii. आत्मबलं न त्याज्यम् आपत्स्वपि।
iii. संसारे दुःखानि सुखानि च चक्रवत परिवन्तते।
iv. अत्यादरः शङ्कनीयः।
v. गतस्य शोचनं न कर्तव्यम्।
vi. विचित्रा दैवगतिः।

**पाठ्यपुस्तके प्रदत्ताः अन्याः सूक्तयः (व्याकरणखण्डतः)**

i. अविद्यस्य कुतो धनम् ?
ii. अधनस्य कुतो मित्रम ?
iii. नास्ति त्यागसमं सुखम्।
iv. नास्ति सत्यसमं तपः ।
v. स्वस्मै स्वल्पं समाजाय सर्वस्वम्।
vi. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।
vii. शरीरमाद्यं खलु धर्मसाधनम्।
viii. धनाद् ऋते न सुखम्।
ix. ज्ञानाद् विना जीवतं शून्यम्।
x. अति सर्वत्र वर्जयेत्।
xi. मतिः बलाद् गुरूतरा।
xii. यत्र धूमः तत्र अग्निः।
xiii. यथा बीजं तथा फलम्।
xiv. यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
xv. मधुरावाणी प्रीणयति मनः।
xvi. सतां बुद्धिः हितकारिणी सदा।

xvii. सतसङ्गति सर्वत्र दुर्लभाः।

xviii. निर्धनता दुःखदायिनी।

xix. यादृशी भावना सिद्धिः तादृशी।

xx. लौकिकी उन्नतिः यशः वर्धयति।

प्रश्न 5 – प्रदत्तानां सूक्तीनां हिन्दीभाषया व्याख्यां लिखतु।
( उपरिलिखित सूक्तियां )

प्रश्न 6 – अधोलिखितस्य विषयस्य सम्बधिता एका–एका सूक्तिं लिखतु।

i. विद्या

ii. धनम्

iii. ज्ञानम्

iv. पर्यावरणम्

v. त्यागः

vi. सत्यम्

vii. जननी

viii. परिवारः

# 18. पाठ—आधारिताः वस्तुनिष्ठ प्रश्नाः

प्रश्न 1 – प्रश्नानां विकल्पभ्यः शुद्धं विकल्पं चित्वा उत्तरतु।

i. संस्कृतं प्रियविषयः अस्ति।

(क) सरोवरस्य (ख) विभवस्य

(ग) रणधीरस्य (घ) प्रखरस्य

ii. भूपेशः कोरबानगरं गमिष्यति।

(क) रेलयानेन (ख) बसयानेन

(ग) वायुयानेन (घ) कारयानेन

iii. अजाचारिकाबालिका खादितवती।

(क) वटिका (ख) वटिकाम्

(ग) वटिकया (घ) वटिकायाः

iv. शृगालः मारितः जातः।

(क) स्थाणु द्वारा (ख) वृद्धा द्वारा

(ग) बालिका द्वारा (घ) वधू द्वारा

v. वपुः आख्याति।

(क) भोजनम् (ख) स्नेहम्

(ग) वंशम् (घ) भाषितम्

vi. खलस्य विद्या भवति।

(क) ज्ञानाय (ख) विवादाय

(ग) रक्षणाय (घ) दानाय

vii. सर्वत्र न भवन्ति।

(क) माणिक्यानि (ख) चन्दनम्

(ग) साधवः (घ) मौक्तिकानि

viii. दृष्टिपूतं न्यसेत्।

(क) पादम् (ख) वाचम्

(ग) जलम् (घ) आरचरणम्

ix. क्रोधात् भवति।

(क) स्मृतिभ्रशः (ख) सम्मोहः

(ग) बुद्धिनाशः (घ) सर्वनाशः

x. अलसस्य कुतः।

(क) सुखम् (ख) मित्रम्

(ग) धनम् (घ) विद्या

xi. छत्तीसगढस्य न्यायधानी अस्ति।

(क) रायपुरम् (ख) बिलासपुरम्

(ग) कोरबानगरम् (घ) जशपुरनगरम्

xii. 'शत्–साहस्त्री–संहिता' कथ्यते।

(क) रामायणम् (ख) पुराणम्

(ग) महाभारतम् (घ) उपनिषदम्

xiii. 'यक्ष–युधिष्ठिर–संवादः' अयं पाठः उद्धृतः।

(क) महाभारतम् ग्रन्थात् (ख) गीतायाः

(ग) रामायणाम् ग्रन्थात् (घ) वेदात्

xiv. 'महाभारतम्' इति ग्रन्थस्य रचयिता अस्ति।

(क) कालिदासः (ख) बाल्मिकी

(ग) तुलसीदासः (घ) वेदव्यासः

xv. 'मुद्राराक्षसम्' इति नाटकं रचितम्।

(क) विशाखदत्तेन (ख) कालिदासेन

(ग) वेदव्यासेन (घ) शूद्रकेन

xvi. 'प्राणेभ्योऽपि प्रियः सुहृद्' अयं नाट्यांशः उद्धृतः।

(क) रामायणम् ग्रन्थात् (ख) पुराणात्

(ग) मुद्राराक्षसंग्नाटकात् (घ) महाभारतम् ग्रन्थात्

xvii. चन्दनदासः आसीत्।

(क) श्रेष्ठीः (ख) मन्त्री

(ग) नृपः (घ) सेवकः

xviii. निशान्ते पिबेत्।

(क) दुग्धम् (ख) जलम्

(ग) वक्रम् (घ) घृतम्

xix. सत्यसमं नास्ति।

(क) चक्षुः (ख) तपः

(ग) दुःखम् (घ) सुखम्

xx. 'यत्र जीवः तत्र शिवः' इत्यस्य मन्त्रस्य साधकः आसीत्।

(क) विवेकानन्दः (ख) आत्मानन्दः

(ग) निखिलानन्दः (घ) रामानन्दः

xxi. 'ओदनं सूक्तम्' पाठः उद्धृतः।

(क) ऋग्वेदातः (ख) यजुर्वेदातः

(ग) अथर्ववेदातः (घ) सामवेदातः

xxii. ओदनस्य शिरः अस्ति।

(क) बुधः (ख) पृथिवी

(ग) बृहस्पतिः (घ) चन्द्रः

xxiii. लावण्येन कन्यायाः नामकरणं कृतम्।

(क) बैशाखा (ख) बिलासा

(ग) लावणी (घ) लावण्यवती

xxiv. अर्थकार्श्येन पीडितः पदातिरेव प्राचलत्।

(क) जनः (ख) आरक्षी

(ग) पुत्रः (घ) न्यायधीशः

xxv. न्यायधीशः आसीत्।

(क) बंकिमचन्द्रः (ख) रवीन्द्रनाथः

(ग) प्रेमचन्द्रः (घ) शरत्चन्द्रः

xxvi. मङ्गलयानस्य मार्गः परिवर्तितः

(क) एकदा (ख) चतुर्दा

(ग) पञ्चदा (घ) सप्तदा

xxvii. मङ्गलग्रहं प्रति यानप्रेषणे प्रथमप्रयासे सफलो जातः।

(क) अमेरिका (ख) यूरोपसंघः

(ग) सोवियत रूसः (घ) भारतः

xxviii. 'हेमन्त–वर्णनम्' इति पद्यांशः उद्धृत।

(क) रामायणम् ग्रन्थात् (ख) रामचरितमानस ग्रन्थातः

(ग) महाभारतम् ग्रन्थात् (घ) पुराणतः

xxix. वायूनां शोधकाः भवन्ति।

(क) पशवः (ख) जनाः

(ग) वृक्षाः (घ) जन्तवः

xxx. तीरथगढ़प्रपातम् अस्ति।

(क) जशपुरे (ख) बिलासपुरे

(ग) बस्तरे (घ) कोरबानगरे

xxxi. ओदनस्य चक्षुः अस्ति।

(क) मूसलम् (ख) उलखम्

(ग) पृथिवी (घ) द्यौः

xxxii. खादपि उच्चतरः अस्ति।

(क) वृक्षः (ख) पर्वतः

(ग) पिता (घ) माता

xxxiii. ओदनस्य मुखम् अस्ति।

(क) बृहस्पतिः (ख) ब्रह्म

(ग) सप्तऋषयः (घ) पृथिवी

xxxiv. स्वामी आत्मानन्दस्य पिता आसीत्।

(क) धनीरामः (ख) मणिरामः

(ग) मतिरामः (घ) यतिरामः

xxxv. मुकुलः पीडितोऽस्ति।

(क) ज्वरेण (ख) उदररोगेण

(ग) शिरोवेदनया (घ) अतिसारेण

xxxvi. उपविश! पेयं पीत्वा गच्छ' इदं कथनम् अस्ति।

(क) मणिकायाः (ख) भारत्याः

(ग) प्रियायाः (घ) पूजायाः

xxxvii. जलपातेन लोष्ठं जातम्।

(क) गलितम् (ख) पतितम्

(ग) चूर्णम् (घ) दृढम्

xxxviii. वृद्धा पक्ववती।

(क) पूरिकाम् (ख) कुण्डलीम्

(ग) वटिकाम् (घ) ओदनम्

xxxix. केन प्रहारेण शृगालः मृतः जातः ?

(क) बाणेन (ख) कुन्तेन

(ग) दण्डेन (घ) मूसलेन

xl. गज उज्जहार।

(क) द्विरेफम्
(ख) पाटलपुष्पम्
(ग) पादपम्
(घ) नलिनीम्

xli. परसुवः भार्यायाः नाम आसीत्।

(क) बिलासा
(ख) बैशाखा
(ग) विशाखा
(घ) विशाला

xlii. बिलासा शैशवकाले क्रीडति स्म।

(क) केवलं बालाभिः सह
(ख) बाला—बालैः सह
(ग) गृह—पशुभिः सह
(घ) वन्यपशुभिः सह

xliii. रतनपुरस्य राज्ञः नाम आसीत्।

(क) कल्याणसायः
(ख) महेन्द्रसायः
(ग) राजेन्द्रसायः
(घ) परसू

xliv. इयं बहुतरी तृणात्।

(क) मनः
(ख) चिता
(ग) पिता
(घ) माता

xlv. मानवः बुद्धिमान् भवति।

(क) श्रुतेन
(ख) तपसा
(ग) घृत्या
(घ) वृद्धसेवया

xlvi. शिष्यः आचार्यात् आदत्ते शिक्षायाः।

(क) सार्द्धम्
(ख) पादम्
(ग) एकोनपादम्
(घ) पूर्णम्

xlvii. मोहनस्य कन्याः सन्ति।

(क) षट्
(ख) सप्त
(ग) अष्ट
(घ) द्वे

xlviii. जनः आसीत्।

(क) चौरः (ख) आरक्षी

(ग) निर्दोषः (घ) अभियुक्तः

xlix. हिमवान् गिरिः इति प्रयुक्तम्

(क) अरावल्यै (ख) हिमालयाय

(ग) सतपुडायाः (घ) विंध्याचलाय

l. नासा 1964 खीष्टाब्दे इत्यनेन मिशनेन मङ्गलग्रहकक्षं प्राप्तवान्।

(क) मेरीनर – 9 (ख) मावेन

(ग) PSLV C-25 (घ) आरायन

# 19. अनुच्छेद / निबन्ध लेखनम्

टीप :– 'निबन्ध–लेखन' लेखन कौशल आधारित है। अतः परम्परागत् से हटकर अन्य छोटे–छोटे विषयों / शीर्षकों का चयन किया जाना चाहिए।

प्रश्न 1 – अधोदत्तं चित्रं ध्यानेन परयतु। चित्रम् आधृत्य प्रदत्त–शब्दानां सहायतया सरल–संस्कृतेन षड्वाक्येषु एकं अनुच्छेदं लिखतु।



मञ्जूषा –

| |
|---|
| बालकः, दीपावली, स्फोटकं, बालिका, चालयति, गृहाणि, ज्वालयति, मोमवर्तिकाः, चाकचाक्यं (फुलझड़ी), उत्सवः, प्रसन्नाः, वृक्षः, परतः। |

अथवा

'ग्राम्यजीवनम्' विषये द्वादशवाक्येषु एकं निबन्धं लिखतु।

प्रश्न 2 – अधोदत्तं चित्रं ध्यानेन परयतु। चित्रम् आधृत्य प्रदत्त–शब्दानां सहायतया सरल–संस्कृतेन षड्वाक्येषु एकं अनुच्छेदं लिखतु।




| मञ्जूषा – | बालकः, विद्यालयः, नाम, वातायनं, अध्ययनं, भवनानि, पठामि, छात्राः, पठन्ति, सन्ति, वृक्षः, पुरतः, पञ्चादशधिकशतम् छात्राः, एकादश अध्यापकाः |
|---|---|

अथवा

'मम् प्रियः कविः' विषये द्वादशवाक्येषु एकं निबन्धं लिखतु।

प्रश्न 3 – अधोदत्तं चित्रं ध्यानेन परयतु। चित्रम् आधृत्य प्रदत्त–शब्दानां सहायतया सरल–संस्कृतेन षड्वाक्येषु एकं अनुच्छेदं लिखतु।



मञ्जूषा –

| |
|---|
| बालिका, पितामहेन, व्यायामं, कुर्वन्ति, महिला, वृक्षाः, प्रातः भ्रमणं, पुष्पाणि, लाभप्रदायकः, सन्ति, पादपाः, उद्यानम्, पक्षी, उपरि। |

अथवा

'पर्यावरणम्' विषये द्वादशवाक्येषु एकं निबन्धं लिखत।

वा

अन्याः शीर्षकाः

i. मम प्रियः महापुरुषः
ii. अस्माकं प्रदेशः
iii. मम प्रियः उत्सवः
iv. वृक्षस्य महत्त्वम्
v. नैतिकी शिक्षा
vi. संस्कृतस्य महत्त्वम
vii. सदाचारः
viii. परिवारः लघु एव वरम्

# 20. अपठित – गद्यांशाः

टीपः – पाठ्यपुस्तक में दिये गये अपठित गद्यांश अभ्यासार्थ है। परीक्षा की दृष्टि से अपठित गद्यांश दिया जाना चाहिए जिसे विद्यार्थी को पढ़ाया नहीं गया हो। नमूनार्थ अधः चार अपठित गद्यांश दिये जा रहे हैं। शिक्षक अन्य गद्यांश भी चयन कर सकते हैं।

प्रश्न 1 – अधोलिखितान् गद्यांशं पठित्वा निर्देशानुसारम् उत्तराणि लिखतु।

(1)

एकस्मिन् नगरे त्रयः बालकाः आसन्। अभिभावकानाम् अनुमतिं लब्ध्वा ते बसयानेन प्रवासं गतवन्तः। मार्गे विपिनम् आसीत् अकस्मात् लुण्ठकाः यानस्य अपहरणं कृतवन्तः। ते भुशुण्डिं दर्शयित्वा उक्तवन्तः – भोः यात्रिणः! स्व–आभूषणानि, स्वधनं च सर्वं यच्छन्तु। अन्यथा मारयामः। सर्वे यात्रिणः भीताः अभवन्। तदा त्रयः बालकाः शनैः शनैः लुण्ठकानां पृष्ठतः गतवन्तः। ते झटिति तेषां हस्तं गृहीत्वा आयुधानि पातययितवन्तः। सर्वे यात्रिणः मिलित्वा लुण्ठकान् ताडितवन्तः। आरक्षकाय च दत्तवन्तः।

प्रश्नाः –

एकपदेन उत्तरत – (½x2=1)

i. सर्वे यात्रिणः मिलित्वा कान् तडितवन्तः ?

ii. मार्गे किम् आसीत् ?

पूर्णवाक्येन उत्तरत – (1x1=1)

iii. लुण्ठकाः भुशुण्डिं दर्शयित्वा किम् उक्तवन्तः ?

यथानिर्देशं प्रश्नान् उत्तरत – (½x4=2)

iv. 'ताडितवन्तः' इति क्रियापदस्य कर्ता कः ?

(क) चालकाः (ख) बालकाः

(ग) अभिभावकाः (घ) यात्रिणः

v. 'तदा त्रयः बालकाः शनैः शनैः लुण्ठकानां पृष्ठतः गतवन्तः?' अत्र अव्ययपदं किम् ?

(क) गतवन्तः (ख) त्रयः

(ग) तदा, शनैः शनैः (घ) बालकाः

vi. एकस्मिन् नगरे त्रयः बालकाः आसत्। अत्र रेखाङ्कितपदयोः विशेषणपदम् किम् ?

(क) नगरे (ख) एकस्मिन्

vii. 'झटिति तेषां हस्तं गृहीत्वा आयुधानि पातयितवन्तः।' अत्र तेषाम् इति पद कस्मै प्रयुक्तम्?

(क) लुण्ठकेभ्यः (ख) आरक्षकेभ्यः

(ग) बालकेभ्यः (घ) यानेभ्यः

(2)

मानवस्य शरीरं प्रथमं धर्मसाधनम् वर्तते। स्वस्थं शरीरं विना वयं किमपि कार्यं कर्तुं न शक्नुमः निश्चतरूपेण स्वास्थ्यं तु आहारे आश्रितम् वर्तते। आहारः अपि हितकरः स्यात्, उचितमात्रायां स्यात् ऋतु–अनुसारं च स्यात् इत्येव स्वास्थ्यस्य आधारः। आहारविषये कथ्यते यत् – 'अतिभोजनं स्वास्थ्यं नाशयति, आयुषः च क्षयं करोति।' अतः वयम् आहारविषयकाणां नियमानाम् अनुपालनं कृत्वा निरामयाः भवेम।

प्रश्नाः –

एकपदेन उत्तरत – (½x2=1)

i. आहारः कीदृशः स्यात् ?

ii. अतिभोजनं किं नाशयति ?

पूर्णवाक्येन उत्तरत – (1x1=1)

iii. प्रथमं धर्मसाधनम् किम् ?

यथानिर्देशं प्रश्नान् उत्तरत – (½x4=2)

iv. 'स्वस्थाः' इति पदस्य अर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?

(क) किमपि न (ख) निरामयाः

(ग) उचितमात्राः (घ) आहाराः

v. अनुच्छेदे 'आद्यं' इति पदस्य पर्यायः कः वर्तते ?

(क) प्रथमम् (ख) स्वास्थ्यम्

(ग) उचितमात्राः (घ) आहाराः

vi. प्रथमं धर्मसाधनम् – अत्र रेखाङ्कितपदयोः किं विशेषणपदम् ?

(क) धर्मसाधनम् (ख) प्रथमम्

vii. 'आहारविषयकाणाम्' अत्र का विभक्तिः प्रयुक्ता ?

(क) द्वितीया (ख) सप्तमी

(ग) षष्ठी (घ) तृतीया

(3)

देशस्य भक्तिः देशभक्तिः कथ्यते। देशभक्तिभावनया एव सैनिकाः अन्ये जनाः च देशहिताय स्वप्राणान् अपि त्यक्तुम् इच्छन्ति। कवयः च वदन्ति – ''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।'' लोकानां शरणदायिनी, बहुभोज्य–पदार्थदायिनी एषा अस्माकं जन्मभूमिः वीरभूमिः वर्तते। राष्ट्रस्य संरक्षणाय परस्परम् एकतायाः भावना अपेक्षिता वर्तते। मानवस्य हृदये यदि राष्ट्रभावना नास्ति तदा तस्य जीवनं निष्फलम् एव। यस्य नरस्य हृदयं राष्ट्रभावना भरितं नास्ति तत् हृदयं पाषाणतुल्यम् एव भवति। अस्माभिः अपि स्वार्थं परित्यज्य देशस्य उन्नतिः देशवासिनों च सेवा करणीया।

प्रश्नाः –

एकपदेन उत्तरत – (½x2=1)

i. अस्माकं जन्मभूमिः कीदृशी अस्ति ?

ii. अस्माभिः किं परित्यज्य देशवासिनां सेवा करणीया ?

पूर्णवाक्येन उत्तरत – (1x1=1)

iii. कवयः किं वदन्ति ?

यथानिर्देशं प्रश्नान् उत्तरत – (½x4=2)

iv. 'परित्यज्य' इत्यस्मिन् पदे कः प्रत्ययः वर्तते ?

(क) क्त्वा (ख) तुमुन्

(ग) ल्यप् (घ) अनीयर्

v. 'अस्माकं जन्मभूमिः' अनयोः पदयोः किम् विशेषणम् ?

(क) अस्माकम् (ख) जन्मभूमिः

vi. <u>'जनानाम्' इत्यस्य पदस्य अर्थे किं पदम् अनुच्छेदे प्रयुक्तम्</u> ?

(क) मानवानाम् (ख) मनुष्यानाम्

(ग) लोकानाम् (घ) मनुजानाम्

vii. 'कवयः' इति कर्तृपदस्य अत्र किम् क्रियापदम् प्रयुक्तम् ?

(क) वदन्ति (ख) लिखन्ति

(ग) पठन्ति (घ) इच्छन्ति

अस्माकं देशे षड् ऋतवः आगच्छन्ति। यथा – ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरः, वसन्तः च। तत्र वर्षा ऋतूणां राज्ञी कथ्यते। वर्षायाः आगमनेन सन्तप्ता पृथ्वी शीतला हरीतिमा च युक्ता भवति। मेघाः आकाशे गर्जन्ति। मयूराः नृत्यन्ति। बालाः वृद्धयुवानः सर्वे आनन्दम् अनुभवन्ति। कृषकाः अति प्रसन्नाः भवन्ति यतो हि वर्षया भूमिः कृषियोग्या भवति। अनावृष्ट्या दुर्भिक्षस्य सम्भावना तथा च अतिवृष्टिः जलाप्लावनस्य कारणं भवति येन जनधनपशूनां च हानिः भवति। अतएव प्रार्थयामः यत् पर्जन्यः सर्वेषाम् सुखाय वर्षतु।

प्रश्नाः –

एकपदेन उत्तरत – (½x2=1)

i. ऋतूणां राज्ञी का कथ्यते ?

ii. भारते कति ऋतवः सन्ति ?

पूर्णवाक्येन उत्तरत – (1x2=2)

iii. जलाप्लावनेन किं भवति ?

iv. कृषकाः केन कारणेन प्रसन्नाः भवति ?

यथानिर्देशं प्रश्नान् उत्तरत – (½x2=1)

v. 'अनावृष्टिः' इति शब्दस्य विरीतार्थकं पदं चित्वा लिखत।

(क) जलप्लावनम् (ख) अतिवृष्टिः

(ग) पर्जन्यः (घ) वर्षा

vi. 'पृथ्वी' इति संज्ञापदस्य अनुच्छेदात् एकं विशेषणपदं चित्वा लिखत ?

(क) सन्तप्ता (ख) युक्ता

(ग) वर्षा (घ) कृषियोग्य

अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (2x1=2)

